Sri Vijaya Sarathi's creative excellence flows unendingly from his earliest work in the form of *Sataka* on *Sri Venugopala* of his native village. To the universal eternal River *Mandakini* touching the poetic beauties of Valmiki, Kalidasa, Bharavi, Sri Harsha, Jayadeva and Jagannadha. When this Mahakavya *Mandakini* was in manuscript form it was read to the audience in various parts of the country and they received it with great applause.

Sri Vijaya Sarathi, while describing the flow of *Mandakini* he enters the deep agony of human mind. The *Mandakini* for him, is like misery of the whole life of the cosmos.

जीव संवेदना p.4

.... मन्दाकिनी

The poet combines in the poem the multiplicity of Indian spiritual approaches in a bid to discover unity in the midst of diversity. He takes care of steer clear of the sectarian traps, and goes about cheerfully celebrating the gushing of *Mandakini* cascading down the matted locks of Mahadeva.

आभील कल्लोल.....................................p.7

....प्रकोपेण

Mandakini captures the glow of waves as the divine ganges flows smoothly on the planes, mirroring the beautiful dawn.

उदयाचलोदिता.....................................p.62

....क्वापि

Mandakini is not content merely with the description of the torturous route of the river in its journey from akasa to *Amrita sagara.* The journey has a rich symbolic significance as suggested repeatedly throughout the poem. The rapid march of the flooding waves bring to mind *Parashakti, Samvit, Sahasrara and Sushumna.* The very evocation of spiritual quest is enough to render the symbolic movement of the poem valid in its own right

The poet a Krantadarshi does not deal with the apparent forms of desire, hatred, violence and other aspects of human imperfections. He tries to transform the psycho spiritual content of the human soul. So that devine forces underlying are revealed and world attains the state of perfect harmony and happiness.

Mandakini is a prayerful Poetic invocation of the descent of Divine Grace in response to the anguished cry of human soul. The divine grace descends to transform human consciousness and to spiritualize the matter. In this poem the eternity has reached the time movement and again it entered to eternity.

कुलपथा कुंचितो.......................................p.84

.....................................रदावलितस्वरुपा च

Sri Vijayasarathi has achieved a remarkable synthesis of form and content with his controled and subtle suggestion of different layers of meaning each functioning independently and yet deepening the total effect.

The rhythm of the poem with its sonorous vocabulary touches subtle layers of the consciousness of the reader. Use of rare Dhatus puts him undoubtedly amongst the most scholarly poets of Sanskrit.

Though *Matra Chandas* is not a new discovery to Sanskrit poets, Sri Vijaya Sarathi took inspiration from *Desi metres* in Telugu literature which find their roots in folk lore. The poet deeply moved by the songs spread in the air of his native village. The music sensibilities awakened in the mind of the poet made him experiment with them.

Though Sri Vijaya Sarathi writes in Sanskrit, he has been a close observer of social changes happening in this country. He describes the contemporary vulgarities and hates all types of exploitation and corruption. He suggests the remedy in adapting the basic spiritual values beyond the limits of religion, caste, race and nation.

His contribution to the Sanskrit literature is significant. He is one of the pioneers, who made it modern by liberating it with the limits of the past and religion. Though in some of the works, he exhibits his scholarship, but most of his works are created in popular Sanskrit.

I had the privilege of being associated with his *Sahitya Yatra* for the last forty years. His search for the soul of Indian cultlure made him to enter the deeper layers of its social religious and spiritual evolution. His whole literary endeavour can be called as a *Tapasya* to reach that eternal light.

......Prof. Kovela Suprasanna Charya,

उपोद्घातः

- डा. श्रीधर भास्कर वर्णेकरः
प्राचार्यः, नागपूर विश्वविद्यालयः

'ईशावास्य मिदं सर्वम्' विष्टभ्याह मिदं कृत्स्नमेकांशेन स्थितो जगत् 'मयातत मिदं सर्वं जगदव्यक्त मूर्तिना' - इत्यादिषु परश्शतेषु परमप्रमाणी भूताप्त वचनेषु यत् सर्वान्तर्यामित्वं सच्चिदानन्द स्वरूपिणः परमात्मनः समुद्घोषितं, तत् खलु भारतीय परम्पसानुसारिणां सर्वेषां सज्जनानाम् अन्तः पटलेषु समुट्टङ्कित मिव सर्वथा। अत एव एतद्देश प्रसूतः पामराऽपि यत्र यत्र मनाग् विभूतिमत्वं, श्रीमत्त्वम्, ऊर्जितत्त्वंवानुभवति तत्र तत्रेश्वर बुद्ध्या शिरसा प्रणमति। सार्वत्रिकी आधिदैविकी धारणा हि खलु सनातन भारतीय संसकृतेः अनन्य साधारणी विशेषता।

अस्मिन् राष्ट्रे सरिन्नाम न केवलं सन्ततं स्त्रवन्ती जडधारेति गम्यते अपितुअष्टमूर्तेः महादेवस्य व्यक्त स्वरूपिणी जलमयीमूर्तिरिति समुपास्यते। ग्राम समीपगा कुनदिकाऽपि तीर्थी भवति तत्तद्ग्राम वासिनां। महाराष्ट्रे हि सर्वत्र ग्रामसमीपस्थाः लोकमातरः सरितः 'गङ्गा' शब्देन व्यपदिश्यन्ते। सोऽयं सरिदर्थेन ग्राम्येषु निरूढिंगत 'गङ्गा' शब्दो नितान्तं पावित्र्यंद्योतयति ग्रामसरितः। नदीनां पावनत्वं गङ्गा शब्देन यथा द्योत्यते, नतथा यमुनानर्मदादिनामान्तरेण । यतो हि विष्णुपदाब्ज सम्भूता शिवकपर्दशालिनी निलिम्पनिर्झरी गङ्गा न केवला महानदी, अपितु 'स्त्रोतसामस्मि जान्हवी' इति भगवद्वचनानुसारेण सा खलु पापताप हारिणी भुक्तिमुक्ति दायिनी च अम्भोमयीमहती देवता इति भारतीयाः सत्पुरूषाःश्रद्दधति । अतएव -'गङ्गा गङ्गेति योब्रूयाद् योजनानां शतादपि,मुच्यते सर्वपापेभ्यो विष्णुलोकंच गच्छति' इति धारणा सर्वत्र भारतीयसमाजे नितरां चिराय जागर्ति। अन्तकाले

च दग्धशेषाः मदीयाः कलेवरांशाः गड्गास्वरूपिणि ब्रह्मवारिणि विलयं यान्तु इति सर्वात्मना कामयन्तेगत कामा अपि तपस्विनः।

सेयं त्रिपथगा मन्दाकिनी सात्विक प्रतिभाविशेषशालिनां परः सहस्राणांसत्कवीनां चिरस्य वाङ्मयसपर्याविषयीभूतेति नाति तिरोहितं भारतीय वाड्ंमयोपासकानाम्। सोयं गड्ंगाजलप्रवाहवदखण्डितो गड्ंगा स्तोत्र प्रवाहो मन्दिरे मन्दिरे, कुटीरे कुटीरे च प्रति प्रभातं जेगीयमानः पेपीयमानश्च परिहरति श्रद्धालूनाम् आन्तरं पापं तापं च। एवम् अनादि कालतोऽनन्त प्रकारैः तोष्टूयमानो मन्दाकिनीमहिमा नाद्यावधि पर्युषितो वा गतरसो वा जातः। हृषीकेश - हरिद्वार - ब्रह्मावर्त- प्रयाग वारणास्यादिषु तीर्थ क्षेत्रेषु प्रत्यक्षीकुर्वतामपि तत्तत्तीर निवासिनां नित्य नूतन इव प्रतिभाति भागीरथीप्रवाहः । एवमेव बहुशो बहुधा च काव्य प्रकारैः जेगीयमानो मन्दकिनीमहिमा नित्यं नूतनतम इवाभाति काव्य रसिकानाम्।

तथाचोक्तं श्रीमदानन्द वर्धनाचर्यैः-

दृष्टपूर्वा अपि ह्यर्था भूयो रस परिग्रहात्
सर्वे नवा इवा भान्ति मधुमास इव द्रुमाः

तथैव वयमपि ब्रूमहे -

श्रुत पूर्वाऽपि गड्गाया महिमा चेन्मुहूः श्रुतः
तनोति नव मानन्दं गीतराग इवोत्तमः

अतएव मन्दाकिनीमाहात्म्यगाने स्वारासिकी प्रवृत्तिः सात्विक प्रतिभावताम्।

अस्मत् सुहृद्वर्यः संस्कृत कविधुर्यः श्रीमान् श्रीभाष्यम् विजय सारथिः अपरितुष्ट इवात्मनः काव्यान्तरविरचनैः आधुनिक कवित्वपद्धत्या

सुरस्त्रोतस्विनीं समुपवर्णयितुं 'मन्दाकिनी' नामेदं किमपि अपूर्व काव्यंनिर्मातुं प्रवृत्तः । 'अपूर्वम्' इति नात्रार्थवादः । सर्वथा अपारे खलु संस्कृत काव्य संसारे परमार्थतः किमपि अपूर्वत्वं काव्येंऽस्मिन् विद्योतते । पुराण ग्रन्थेषु समुपवर्णिता सर्वत्र सुप्रार्थिता च गङ्गावतरण कथा श्रीमता विजयसारथिना संस्कृत साहित्यसंसारस्य गीतिकाव्य दारिद्र्यं मनाङ् निवारयितुंपञ्चमात्रकेषु गीतेषु निबद्धा । वस्तुतस्तु अनुष्टृ-बार्या वसन्त तिलका-मालिनी-शिखरिणी-शार्दूलविक्रीडितादिषु च्छन्दो वृत्तेषु निबद्धानि अपिकाव्यानि तत्तद्राग विशेषम् अवलम्ब्य सुष्ठु गातुं शक्यन्ते । महाराष्ट्रीयाःनारदीयकीर्तनकलाकोविदाः राग तालानुसारं छन्दोवृत्तगानंसम्यक्कुर्वन्ति । परं तत्तेषां सांगीतिक रागात्मकंछन्दोवृत्तगानकौशलं संस्कृताध्ययन मिव क्रमशो ह्रासं गच्छदिवानुभूयते साम्प्रतम् । वाराणसीयेनएकेन कीर्तन कलाकोविदेन संस्कृत पण्डितेन छन्दस्संगीतशास्त्रयोःस्वाभाविकं समन्वयं प्रदर्शयितुं विलिखितः कोऽपि श्लेषमयोलक्षण ग्रन्थोऽस्माभिः पञ्चविंशतिवर्षेभ्यः प्रागवलोकित आसीत् । परं गच्छताकालेन स हस्तलिखितोग्रन्थः केनापि दुर्वृत्तेन जारजन्मना वाङ्मयचौरेणअपवाहितः । दुर्भाग्येननाद्यावधि तद् वाङ्मय चौर्यं प्रकाश मागतम् ।

आधुनिकाः संस्कृत साहित्यका रसभावसान्द्राण्यपि काव्यानि नीचैः स्वरेण पठन्ति, उच्चैः स्वरेण वा रटन्ति नतु सुस्वरं सरागं च गायन्ति । सुगम सङ्गीत पद्धतिम् अवलम्ब्य प्रादेशिकानां प्राकृतकाव्याना मिव संस्कृत काव्यानाम् उद्गानं भवतु इति मन्दाकिनी काव्य प्रणेतुःहार्दिकीं मनीषां गानकला कुशलाः संस्कृतज्ञाः पूरयेयुरिति आशास्महे ।

लोकगीत पद्धत्या समुपनिबद्धेऽस्मिन् मन्दाकिनीकाव्ये सहृदया हृदया वर्जकाः साहित्य गुणा वैविध्य प्रकर्षेण विद्योतन्ते सर्वत्र । विशेषतश्च प्रवाहस्य गतेः ध्वनेश्च वैविध्यं वैदग्ध्यं चाभि व्यञ्जयितुं गमनार्थकानां ध्वन्यर्थकानां च धातूनां यानि नानाविधानि रूपाणि कविना कुशलतया विपुलतया च गुम्फितानि तानि खलु पदे पदे चमत्कुर्वन्ति हृदयं मन्दाकिनीकाव्यावगाहकस्य । मन्दाकिनीसलिल प्रवाहे सलीलं स्वच्छन्दं

च विहरन्ति विचित्राणि यादांसीव नानाविधानि धातुरूपाणिचञ्चन्ति खलु मन्दाकिनीकाव्य प्रवाहेऽस्मिन्। तथा च तत्रत्या उल्लोलाःकल्लोला इव अत्रत्या वैविध्य विपुलाः शब्दार्थालंकाराः आवर्जयन्तिमार्मिकस्य चित्तवृत्तिम्। मन्दाकिनीतीरवर्तीनि तीर्थस्थलानीव आकर्षन्ति अत्रत्यानि तत्तच्छास्त्र पाण्डित्य विलसितानि । एवंगुणं विविधगुणगणमडिण्तं मन्दकिनीचरितं विरचयन् कवि रयं 'स्थाने खलु देवीं वाचं व्यवीवृतत्' इति मन्यामहे।

आधुनिक संस्कृत काव्य स्रोतस्सु श्रीमतां श्रीभाष्यं विजयसारथि महोदयानाम् इदं मन्दाकिनी काव्यं नूनं त्रिपथगायते इत्युक्ति र्नात्युक्तिः स्यात् । भगवती·त्रिलोकीकूलंकषा कविवरस्य सर्वंकषं श्रेयः प्रेयश्च वितनोतु इत्येव प्रार्थयामहे।

श्रीधर भास्कर वर्णेकर

मंगलाशासनम्

-कविशाब्दिककेसरी, श्रीमान् न.च. रघुनाथाचार्य स्वामी

स्वस्ति सौहार्दाय

एवं हि तत्वविदो वदन्ति - 'सृष्ट्युपक्रम मेव भवति सर्वोपनिषदां ब्रह्मचिन्तारंभ' इति जडात्मिकाऽपि विचित्रा ब्रह्माण्ड सृष्टिरियम ्ओतप्रोतविधया सङ्कल्पत स्तेनानुविधीयमाना चेतयमानेव प्रणयिनी नाट्याभिनयभङ्गीभिः तस्यैव लीलारस मुल्लयति। तदाह ब्रह्मसूत्रकारो ऽपि 'लोकवस्तु लीलाकैवल्यम्' इति । इय मेव यथापुरं परिणद्धा सृष्टिः स्वेनलब्धव्यतिकरं जीववर्ग मपि ब्रह्मणोंऽशम् आप्याययति विविध भोगप्रदानेन । एवं लीला - भोगरसयो रन्ते च नीरवा सुप्तेव कीलि तेव च ब्रह्मणि परमचेतने पुन रेव प्रलीयते तदंशै स्सह।

ब्रह्म हि परमचेतनं रसात्मकं च - 'परंज्योतिः - विज्ञानघनः - सर्वज्ञः -रसो वै सः - आनन्दमयः - इति बहूधाश्रुतिभि रूपश्लोकनात् । तदेव भगवत स्तत्वं 'प्रशान्तानन्तात्मानुभवजमहानन्दमहिम्ना प्रसक्तस्तै मित्यानु - कृतवितरंगार्णव दश' मिति श्रीवत्सचिह्नमिश्रादिभिः गुरू वरै रभिष्टुतम्तदेवं, ज्ञानानन्दपरिपूर्णस्यैवं परमपुरूषस्य कदाचित् निस्तरंगसमुद्रवत्प्रशान्तता कदाचिच्च कल्लोलमालाक्षुभितसमुद्रवत् प्रमोदरसव्यञ्जनीउच्छ्रायोद्रिक्तता चेति स्थितम्।

आपो हि ब्रह्मणः आद्यैव सृष्टि :-

कृता विह प्रियं समुद्रराज मभिसरन्त्याः विविधभावानुबन्धबन्धुरेण स्वसञ्चारचारिम्णा तदीयंलीलारसमुद्वेलयन्त्याः जलचर मिव स्थलचर मपि प्राणिजातं जीवनप्रदानेन परिपोषयन्त्याः मन्दाकिन्याः प्रकृति रूपगीयमाना पूर्वोक्त मेव भगवति लीलाप्रदं तदंशजीवराशौ भोगप्रद ञ्चप्रकृति सृष्टे र्विलास मभिव्यञ्जयतीति परमार्थः ।।

क्वचित् प्रसन्न गंभीरा क्वचि च्चटूलचंक्रमा
क्वचि दोजस्विनी क्वापि मन्दसुन्दरगामिनी
क्वचिद् विविधशास्त्रार्थसंभिन्नपदबन्धुरा
क्वापि नानारसैः श्लिष्टा जीया न्मन्दाकिनी कृतिः ।

सदश्वा विव शब्दार्थौ प्रतिभाप्रग्रहाञ्चितौ
सत्पथे सारयेद् यः स विजयीसारथि र्भवेत्
कृति रेषैव विस्पष्ट माख्यातीतरदुर्लभम्
धन्ये कविवरेऽमुस्मिन् द्योधुनीसदनुग्रहम्

अन्ते च श्रीवेदान्तदेशिकस्येमां सुभाषितसूक्तिम् अनुस्मारयन्तो विस्तरा द्विरिरिंसामः सा चेयं सूक्तिः-

'मनुव्यासप्राचेतसपरिषदर्हा क्वचि दियं
सुधासिक्ता सूक्तिः स्वयं मुदय मन्विच्छति जने
निरूध्युः के, विन्ध्याचलविकटसन्ध्यानटजटा -
परिभ्रान्ता पंगो रूपरि यदि गंगा निपतति ।2

अवतारिका -

अभिजानन्त्येव समेऽपि सुमनसो विद्वांसः, शङ्करजगन्नाथनीलकण्ठ प्रमुखा महापुरूषा भगवतीं भागीरथीं स्तुत्वा तस्या अनुग्रहविशेषेण परमांप्रतिष्ठाम् अवाप्स्यन्तीति । तेषाम् अनुकरणेन अनुसरणेन च वय मप्यात्मनः कृतार्थतां मन्यामहे । ऐहिकामुष्मिकफलदात्रीति गङ्गेयं बहुपुराणेषु बहुधाऽजेगीयत । भगवत्या स्सुरसरितः पर मावतरणकथा गीतेषु ग्रथिता मया। औचित्यदृशा किञ्चिदिव परिवर्ति तापि कथा।काव्येऽस्मिन् विषयो ऽय मेवं सन्दब्धोऽस्ति

'प्रादान्मन्दाकिनी मात्मसुतां परिवहराजः सागराय। सङ्गन्तु मुत्कण्ठ तेसागरोऽपितया । कल्लोलै रभ्रङ्कषै स्तां बलात् ग्रहीतु कामोऽपि शासनात्भगवतो बिभाय। वेलेयं न कदाऽपि भवता तिक्रम्यता मिति तं भगवानपिबलवद् आदिदेश। गड्ंगाया बलवदवतारणेन लोकस्यापकृति र्भूयसीभवे दित्युभयधा सन्त्रस्त इव सागर स्सौवा दुद्यमात् व्यरंसीत्। विरहवेदना मसहमानोऽपि सोऽयं किंकर्तव्यताविमूढेन मनसा क्षणमि वविचिन्त्य भगीरथं स्वपरमसखं राजप्रतिनिधिम् आकार्य तं प्रार्थयामा सैवम्'सखे। भवता कथमपि प्रेयसी मम सेयं सुरसरित् आनीयता मिति, सोऽपिभगीरथ स्स्वमनोरथं सफलमेव मन्वानः कपिलेन शापाग्निना भस्मसात्कृतान् स्ववंशीयान् गड्ंगाजलाप्लावनेन परलोकम् अवापयितुं सागराभीष्टञ्चसफलं कर्तुं ता मानेतुं समुद्यतः सागरानुमत्या स्वर्लोक मयासीत्।

आतिथेयविधिना सत्कृतेन भगीरथेन प्रार्थिता कथित मात्मप्रियस्य सागरस्य सन्देश मन्यमुदन्तञ्च समाकर्ण्य गाढं निश्वस्य च तं प्रत्येव मवोचतं सा सुरनदी - 'भ्रात । रहमपि सागरं प्राणेश्वर मुपगन्तु मुत्कण्ठया समुदीक्षे-प्रत्युत मत्प्रवाहसंपातं भूमाता न कदाऽपिसोढु शक्नुयात्। यदिनाम भगवान् गिरिशो मां वोढुं नियत मभ्युपागमिष्यत् तदा ममावतरणं निर्बाधम् अभिविष्यत् अतः कार्य मिदंसाधयितुं तमेव शिवम् अभ्यर्थयस्व।

तथा भगीरथेन तेन संप्रार्थितो भगवान् सदाशिव स्सुपर्वापगां दरीध र्तुमुररीचकार। सैषा परिवहमण्डला दात्ममन्दिरा दवततार शिवशिरसि सङ्कोचितेनैव स्त्रोतसा।फालानलेन विषानलेन चाशीविषानलेन पोप्लुष्य माणवपु स्सोऽपि सुरधुनीशिशिरवारिस्पर्श मात्रेण अननुभूतपूर्वं सुखं किमप्यवाप्नुवानः तां सर्वदा निजकपर्दएव बन्दीकर्तुं याव दियेष तावदेवास्य भाव मवगम्य वर्धितदुर्भरधाराबहुलेन स्त्रोतस्स्वरूपेण विजृं भमाणा तस्य जटाजूटमयीं कारां निर्भिद्य बहि र्निरगमत्। अवतीर्य च भुविसप्तधाविभक्तैः स्त्रोतोभि स्सकलमपि भूमीतलं पुनती भगीरथ पथमनुरून्धाना तपोवनानि सादर मभिनन्दन्ती, वनानि सिञ्चन्ती, भूधरा न्भिन्दती, गहनानि छिन्दती, पूरै र्मरून् पूरयन्ती केदारान् फलयन्ती, क्षेत्राणि तर्पयन्ती, ग्रामान् पुराणि पल्लीश्च रञ्जयन्ती प्रकृति मखिलां पुलकयन्ती, सागरदूतीभि रापगाभिर्मिलन्ती, पुण्यानिकिरन्ती, दुरितान्यप नुदन्ती ऊष्माणं चूषन्ती, तीर्थानि सार्थयन्ती, परासून् भगीरथवंश्या न्लेखलोक मवापयन्ती, प्रजा मखिला माबालगोपाल मामोदयन्ती चान्तेसागरेण प्रियेण मिलित्वा तदन्तरङ्गे निलीना भवति।

इद मप्यपर मवधेय मस्ति सादरं सुमनसाम् यत्-अधुना विविधा सुभाषासु गीतस्यैव संरंभो दृश्यते। प्रतिभाषं काऽपि नवीना साहिती प्रक्रिया नूत्नेन पथा नरीनृत्यते। सारस्वते सर्वतः कोऽपि सर सस्समुन्मेषो देदिवीति। लोकगीतनाम्ना प्रचलितस्य गीत मयस्यैव साहितीविशेषस्य साम्राज्यं प्रचलति। संस्कृते वचन प्रक्रियाया इव गीतप्रक्रीयाया अपि वराक्येव स्थिति र्वरीवर्ति। इदानीन्तनाः कवयोपि वचनदारिद्र्यमिव गीतदारिद्र्यं व्यपोहितुं समुत्सहन्ते समुद्यतन्तेच। अमुनैवलक्ष्येण गङ्गवतरणकथा पञ्चमात्राकेषु गीतेषु निबद्धा।प्रवाहस्यगते र्ध्वनेश्च वैविध्यं वैदग्ध्यं चाभिव्यञ्जयितुं प्रायोग मनार्थका ध्वन्यर्थकाश्च धातवः प्रयुक्ताः काव्ये स्मिन्। नियतं सर्वाण्यपि गीतानि रचनासौन्दर्येण जीवन्ति। तथा पि यथामति काव्ये स्मिन् रसस्यभावस्य रीते र्नीते श्शब्दस्यार्थस्य च प्रामुख्यं सर्वधापरिकल्पितम्। प्रवाहगताविव अत्रापि क्वचिद् विलंबः क्वचिद् ऋजुता क्वचिद् विश्लथः

क्वापि लघुता क्वापि गुरूता क्वाप्योजस्विता क्वापि प्रसन्नता चेत्यादयो गुणरीतय स्समुदञ्चन्तीति अलम् अतिप्रसड्ंगेन । इति

--लेखकः

मन्दाकिनी

अकति मन्दाकिनी
चकति मन्दाकिनी
तकति मन्दाकिनी
मधुरेण पूरेण

चलति मन्दाकिनी
जलति मन्दाकिनी
सलतिं मन्दाकिनी
विमलेन सलिलेन ॥

सा परेवायाति
सूक्ष्मेव साऽऽयाति
स्थूलेव साऽऽयाति
नाद कूलङ्कषा

घोषरावस्वन ध्वनिशब्दविस्फोट
झंकृतिध्वंकृतिव्यक्त नादाञ्चिता
सा परा वागिव व्यक्तक्रमोदया
परिवहप्राङ्गणा दवतरति सुरनदी

स्यन्दते स्पन्दते स्कुन्दते स्वर्णदी
परिवहस्यावधौ प्रेयसा स्रोतसा
सूदते मोदते ह्लादते स्वर्णदी
परिवहस्याजिरे श्रेयसा पाथसा

योतते जोतते श्रन्थते स्वर्णदी
परिवहस्यांगणे भूरिणा वारिणा

अहंते महंते बहंते स्वर्णदी
परिवहप्रांगणे धीरया धारया

अकति.......

वक्रताकुञ्चिता
चित्रभंग्यञ्चिता
कलनादगुञ्जिता
रसरीतिरञ्जिता

कविमहाकृतिरिव
प्लावयितु मुद्यता
जगदिदं स्पन्दते
मधुरिमस्यन्दिनी

उल्लोलकल्पना-
कल्लोललीलया
हृदयकूलंकषा
गगनकूलंकषा ॥

सत्वसम्पत्तिरिव
तत्वसंवित्तिरिव
सत्यानुभूतिरिव
नित्यसंवीतिरिव

सकलमपि विश्वमा -
प्लावयितु मुच्चलति
स्त्रोतस्स्वरूपेण
लोकानुरूपेण ॥

अकति........

संसारसेतुरिव
जीवजीवातुरिव
निर्वाणहेतुरिव
निष्कामकेतुरिव

परिवहति परिवहान्मन्दाकिनी ।
आनन्दरसधुनी मन्दाकिनी ॥

कल्लते मल्लते घनवियन्मण्डले
कञ्चते काञ्चते घनतमोमण्डले
शल्भते गल्भते स्तनयित्नुमण्डले
त्रंकते वंकते तारकामण्डले
जोतते योतते ज्योतिषां मण्डले
सूदते ह्रादते सौरे पिमण्डले
श्विदन्ते स्कुन्दते चन्द्रमोमण्डले

वह्निमण्डलमेति संविन्नदीव सा
फालानलं सुधापूरेण स्वर्णदी ॥

गोविन्दपोपूत -
पादारविन्द्मक -
रन्दसन्दोहनि -
प्यन्दिमन्दाकिनी
वृन्दारकानन्दसंधायिनी
आनन्दरसधुनी मन्दाकिनी

आम्नायरसधुनी मन्दाकिनी ॥

मञ्जुलाधोमुखी चारूवर्णाकृति -

र्वक्रगतिरात्मभुवनोन्मेषकारिणी
चञ्चत्सहस्त्रारपाथोजबिसतन्तु -
सूक्ष्मा चिरत्नतटिदाभा सुषुम्णेव
श्रान्ति मपनेतुमिह भूमीमयाधार
चक्र ममृतोन्मिषत माधातु मायाति ॥

अकति..........

जीवसंवेदनालहरीव गोमातृ
वेदनालहरीव निर्वेदलहरीव
तारकार्दितवियद्वेदनालहरीव
पुरूखगोलस्पन्दमयशक्तिलहरीव
मौनिमानसशान्तलहरीव कविहृदय -
करूणरसलहरीव कसति मन्दाकिनी
रोदसीकूल मुत्कषति मन्दाकिनी ॥

चन्द्रगोलस्त्रवत्पीयूषलहरीव
नववियन्मन्दारमकरन्दलहरीव
संविन्मयानन्दलहरीव सज्ज्योति
रूल्लोललहरीव मुल्ललल्लहरीव
भूलोकचिरतपस्संधुक्षितानन्त
संवीतिलहरीव रंहसा निष्यन्दते -

स्वर्णदी
रंहसा संस्पन्दते ।

दिवि चिणीनादेन चिणिचिणीनादेन
घण्टानिनादेन शंखपरिणादेन
तन्त्रीनिनादेन तालगतिनादेन

कलवेणुनादेन भेरीनिनादेन
मर्दलनिनादेन पाथोदनादेन
नैकधाकाशतल मुन्नादयन्ती च
प्रणवगम्भीरतां प्रतिपादयन्ती च

चिन्नदीवायाति मन्दाकिनी
मुन्नदीवायाति मन्दाकिनी ॥

सन्तमससंवृताकाशवीथीस्फुर
त्सौदामनीरोचिरूल्लोलधारेव
अत्यन्तमेचकस्तनयित्नुसंवृत
व्योमविद्योतमानेरम्मदालिरिव
निरवद्यहृद्यतरतरलताराकाश
तारहारप्रभावीचिरिंछोलिरिव

विश्वकल्याणाय वियदंगणा -
दवतरति शिवशिरसि मन्दाकिनी ॥

विष्णुपदसंस्पृशा श्रीकरेणेव सा
विष्णुपदविभवेन हंसरूचिरेणेव
कुवलयेनेव बहुजीवनेनोद्यता
जीवनेनेवसुमनोमुदाधायिना

शब्दशास्त्रेणेव रूपावतारगुण
वृद्धिविस्फारेण नारायणेनेव
सर्वदातीतागमाञ्चलव्रातेन
मृत्युञ्जयेनेव कामप्रशमनेन
चण्डप्रवाहेण वियदंगणात्
अवतरति शिवशिरसि मन्दाकिनी ॥

शकटास्यलालसन्मञ्जुलाकारेण
नागापसर्पितोदारस्वरूपेण
उद्वृत्तविभ्रमस्फीताम्बुपूरेण
एलकाक्रीडितेदञ्चत्तरंगेण

अवतरति शिवशिरसि मन्दाकिनी
लास्यरसवाहिनी मन्दाकिनी ॥

मन्दीकृताकाण्डविलयक्रियाशौण्ड
रंहस्समुच्चलितबृंहत्प्रवाहा च
प्रोत्तालहिल्लोलझालञ्झलाराव
बधिरीकृताशेषहरिदन्तराला च
नीरन्ध्रनीरोधनिश्शंकनिस्तोक
निर्यन्निजप्रवाहप्लवावेगा च
धारावितर्कितापतितोद्धतैराव
तादिहरिदधिपालमत्तमातंगा च

तीव्रतरवेगेन वियदंगणा
दवतरति शिवशिरसि मन्दाकिनी ॥

स्रोतःपताकिनीरिंगत्तरंगप्र
चण्डप्रपातेन निर्भिद्य निष्पतेत्
क्ष्मातल मलाबुफलकर्पर मिवैतदिति
चतुरास्यनिर्माणसौन्दर्य मविचिन्त्य
भूतेषु वात्सल्य मपहाय यद्यहं
निष्पतेयं तदा मानवानां जग
न्नमावशेषितं स्यादिति त्रस्तैव

संकोचयन्तीव स्रोतस्सवकम्
अवतरति शिवशिरसि मन्दाकिनी ॥

संवर्तसलिलमुग्गम्भीरकल्लोल
गर्जिता ज्जीवहृद्दारणं मास्मेति
सावलेपापतत्सौवप्रवाहेण
गौरीशकबलीक्रियाऽपि मा भूदिति
प्रणिपनीपतयालुमत्तरंगप्लवै -
स्सुरलोकविप्लवो माभू त्कदापीति
स्वच्छन्दमुत्पतत्स्रोतोजलोच्छ्वसित
पातेन वैजयन्तस्य माध्वंस इति

संकोचयन्तीव स्रोतस्स्वकम्
अवतरति शिवशिरसि मन्दाकिनी ॥

आपरिवहाकाश माशिव जटाजूट
मायताभि र्वीचिमालाभि रञ्चिता
संन्दिदृक्षोल्लसल्लेखांगनाकीर्ण
हृदयंगमापांगभंगीभिरपि समं
अभिनन्दनोक्तिशतमुखरीकृताननान्
मुक्तमन्दारमधुपुष्पवर्षानपि
सिद्धचारणगणा नकुतोभयोल्लोल
हिल्लोलदोलाभि राहरन्ती तदा

नृपभगीरथसाधुसम्प्रार्थिता
अवतरति शिवशिरसि मन्दाकिनी ॥

आभीलकल्लोलझञ्झानिलावेग
संघाततोऽतीव परिभीतचेतस्सु
प्रालेयगिरिकम्रकन्दरागारतो
विद्याधरादिषु प्लायमानेष्वेव
दारै स्समं गिरिशपार्श्वानुवर्तिषु
क्वापि कोणे समुत्क्षिप्तेषु तेनैव
तूलवत्प्रमथेषु रंहः प्रकोपेण

विश्वकल्याणाय वियदंगणात्
अवतरति शिवशिरसि मन्दाकिनी ॥

विश्वतोमुख संभ्रमप्रवाहभ्रमं
निग्रहीतुं जटाजूटेन विकटेन
साहसा दुद्यतं गिरिशं तपस्विनं
तीव्रवेगभ्रमत्प्रोत्तालहिल्लोल -
पाणिसंचालितै र्नन्दनानोकहै
रूद्यद्गदायुधै रिव हन्तु मुद्यता

तीव्रतररंहसा गगनांगणा
दवतरति शिवशिरसि मन्दाकिनी ॥

परमाणि वासांसि परिमलद्रव्याणि
मन्दारदामानि मण्डना न्यन्यानि
परिजना नप्सरस्सिद्धचारणगणान्
प्रथमभिक्षुकधर्मपत्न्यै प्रदातु मिव
मञ्जुतरकल्लोलमारूतावेगेन
ऋभुलोकहेवाकरम्यहर्म्यांगणा

दादरा दाहरन्ती स्त्रवन्ती
अवतरति शिवशिरसि मन्दाकिनी ॥

विश्वसुन्दरशिल्पनिर्माणपारीण -
धातृहत्यावृजिननिर्मूलनायेव -
पुञ्जीभवत्तमोभीमोग्रतावेश -
दक्षाध्वरध्वंसदुरितहरणायेव
संततचिताभस्मभूताधिपत्य -
श्मशानसंवासाघसंक्षालनायेव
सततप्रवर्धमानाखिलप्राणिसं -
तानसंहारदुष्कृतवारणायेव

अवतरति शिवशिरसि मन्दाकिनी ॥
पुण्यरसवाहिनी मन्दाकिनी ॥

स्वेर्मीसमीरकृतपारणापीवरे
शिवजटाजूटतटदन्दशूकोत्करे
मौलिगतजुहुराणपालनव्यग्रे च
साद्भुतं सोद्वेग मद्रिजाया मेव
मालोकयन्त्यां महोग्रस्य हुंक्रिया -
प्रतिहुंक्रियाकृदपि तस्यैव भर्गस्य

वल्मीकरन्ध्रमिव गौरोरगी
प्राविशत् सा जटाजूटम् ॥

फाले निशातया दृशाया विभासुरं
मौलौ तथा कुण्डलीन्द्रेण चन्द्रेण
भासमानं कामजेतार मीशान

मोंकारपारीण मादिमं योगिनम्

अमृताभिषिक्तमिव संविन्नदी
विदधाति वियदापगा प्रसन्ना ॥

मल्लीसुमायितान् शिवजटावल्लीषु
विस्फुलिंगायितान् फालानलार्चिष्षु
पद्मरागायितान् आशीविषफणासु
मुक्ताफलायितान् नृकपालशुक्तीषु

ओलण्डयति शीकरान् स्वर्णदी
अन्तःकपाल मुल्लोडयन्ती ॥

कालियोरगराजगाढनिर्बन्ध मिव
घूर्णितै स्ताडितै रूल्लोडितै रेव
दूनयन्ती कृष्णमूर्ति रीश्वरजटा -
जूटकारागारदुर्बन्ध मवदार्य

रंहसा बहि रूत्प्लुता स्वर्णदी
बृंहत्प्रवाहेन बहि रूद्गता ॥

विलयानलाभीलफालानलज्वाल -
मालिकाकृततापपरिवारणायेव
कालोरगावलीफूत्कारविस्फार -
विषवहि् नकृततापपरिवारणायेव
अतिघोरकन्धराकालकूटज्वलन -
कल्पितान्तर्दाहपरिवारणायेव
दुर्वारदुस्सहप्रोद्यत्तपोवहि् न
संजातसंतापपरिवारणायेव

निजशिरस्येव बन्दीकर्तु मिच्छन्त
ममृतापगां सदा स्वा मनललोचनम्

प्रज्ञया परिभूय मन्दाकिनी
अवतरति गिरिशिरसि मन्दाकिनी ॥

पुष्कलस्तनयित्नुनिस्तनिततारेण
गिरिगुहाजृंभितप्रतिनादधीरेण
दिग्भ्रान्तयक्षादिपरिदेविताढ्येन
प्रोत्पतत्पतगालिवाशितप्रसितेन
संत्रस्तकरिपोतचीत्कारबहुलेन
भयधावदहिराजफूत्कारनिचितेन
दिङ्मूढपंचास्यगर्जितगभीरेण
द्रुतसमस्तप्राणिरूदितविस्फारेण
दुस्सहाशनिशातस्फूजितक्रूरेण
प्रोत्तालकल्लोलकलकलापूरेण

क्षुभितमिव कुर्वती भूमीतलम्
अवतरति गिरिशिरसि मन्दाकिनी ॥

आशाविजित्वरै स्सुभाटायमानै र -
भंगै स्तरंगै स्सुतुंगै स्समुद्यता
धाराभि रत्यन्तघोराभि रूद्धता
हेवाकसंभ्रमै स्संभ्रमै स्सज्जिता
दुर्भेदशिवजटाजूटदुर्गद्वार
मत्यन्तरंहसा निर्भिद्य सत्वरम्

अकुतोभया जवति मन्दाकिनी
साटोप मुत्प्लुता मन्दाकिनी ॥

प्रालेयशैलस्य नवनीतहृदयस्य
सौवस्य ज़नकस्य पादे पतन्तीव
धारभि रपि मस्त मभ्यञ्जयन्तीव
द्रष्टु मिव दृश्यानि नीहारखण्डानि
रत्नौषधीधातुरसराशिलसितानि

तत इतोऽऽपि क्षणं मन्दाकिनी
विजरीहरीति सा मन्दाकिनी ॥

बन्दीकृताया युमावल्लभेन पशु -
पतिनाच सौवजामात्रैव मह् यम् -
किं त्वया कृत महो, किं ममापि त्वया
तव मुखं नच दर्शनीय मिति कोपेन

संत्यजन्तीव सा मिहिकाचलम्
अवतरति भूतले मन्दाकिनी ॥

अव्यक्तमण्डलव्यक्तस्वरूपा च
दीव्यन्महाकाशसंचारपूता च
स्त्यानप्रमादादिदुर्दोषवीता च
चंचद्रजस्तमस्स्थितिलेशरहिता च
शुद्धसत्त्वोद्रेकसंवलितधारा च
जटिलभीमोद्धताहंकारहुंकार
मवधूय लीलया प्रकृति मापुनती च

चित्स्रवन्तीवैति मन्दाकिनी
मुत्स्रवन्तीवैति मन्दाकिनी ॥

निर्भिद्य शिवजटाजूटबन्दीगृहं
निर्गम्य नीहारगिरितुंगशृंगतो
निष्पत्य भूतले निर्घृष्य दिक्कूलं
निष्पूर्य मरूतलं निर्मूल्य मालानि
निस्सरन्नीरेण निर्यत्प्रचारेण
निरवद्यसारेण निर्मलाकारेण
नीरन्ध्रधारेण निर्गतासारेण
निर्मृष्टतीरेण निर्णिद्रपूरेण

वेगेन दोद्रोति मन्दाकिनी
वाजेन सोस्त्रोति मन्दाकिनी ॥

आनन्दिनी मन्दनिष्यन्दिनी विन्दु
सम्मन्दिनी सिन्धुसंबन्धिनी पाप -
निर्बन्धिनी गगनराणनन्दिनी वन्दि -
बृन्दारकानन्दिनी -
गोविन्दपदवन्दिनी
शिवजटाजूटाटवीबन्दिनी

मन्देतरं जवति मन्दाकिनी
मन्देतरं द्रवति मन्दाकिनी ॥

कंकेषु पारावतेषु दाक्षाय्येषु
चाषेषु करटेषु कर्करेटुष्वपि
क्रौञ्चेषु चन्द्रकिषु कुररेषु चक्रेषु
हंसेषु तित्तिरिषु लावेषु मद्गुषु
कारण्डवचकोरहारीतकुक्कुभ -
प्लववर्तकातापिमल्लिकप्रभृतिषु
त्रस्तेषु नभसंगमेषु चोड्डीनेषु

सौवधारोकिनीसांराविणादेव

अवतरति भूतले मन्दाकिनी
अमृतरसवाहिनी मन्दाकिनी ॥

कदलीषु चीनेषु प्रियकेषु रामेषु
सृमरेषु कन्दलीकृष्णसारेष्वपि
सैरिभेषु वृकेषु घोणिषु तरक्षुषु
श्वावित्सु भल्लेषु शरभेषु सिंहेषु
संजातवेपथुषु दिङ्मूढचित्तेषु
स्तब्धेषु मुग्धेषु कान्दिशीकेष्विव
क्रन्दत्सु विरूवत्सु निपतत्सु विलुठत्सु
मृत्युदर्शं परित्रस्यत्सु धावत्सु
संवर्तपुष्कलावर्तकस्तनयित्नु-
रसितोपमोर्मिकुन्दुमिनीनिनादेन

अवतरति भूतले मन्दाकिनी
अमृतरसवाहिनी मन्दाकिनी ॥

गडकेषु शिशुकेषु शंकुषु ग्राहेषु
राजीवमकरेषु नडमीनशकुलेषु
पाठीनकुंभीररोहितांबुचरेषु
सूत्पतन्निपतत्सु नन्दत्सु खेलत्सु

अवतेरति भूतले मन्दाकिनी
अमृतरसवाहिनी मन्दाकिनी ॥

नटराजजूटतटनानटज्जुहुराण-
भित्तच्च्युतामृतासारपरिपूरिता

नीहारगिरिसान्द्रनीहारशीकरा-
सारसंपूरिता चारिमापूरिता

प्रालेयशैलतो मन्दाकिनी
अवतरति भूतले मन्दाकिनी ॥

काचिदपि मेधेव धारणाशालिनी
चार्वीव काचनोहापोहनिपुणा च
चत्वेव विषयग्रहैकताना कापि
का प्यात्तवस्तुसंग्रहणा गृहीतीव
श्रौतीव कापि गुरूशुश्रूषयाऽञ्चिता
प्रतिभेव नवनवोन्मेषांचिता कापि
पण्डेव तत्त्वानुसन्धानतत्परा
काचिदपि धाराच लोक माप्लावयति

बुद्धिरिव सप्तधाभिन्ना सती
चेतयति मानवान् मन्दाकिनी ॥

विविधमौलिकवादधारापरीता च
निर्धूतदूरजःप्रबलावलेपा च
सर्वदाऽविच्छिन्नजीवनोल्लसिता च
सर्वधानुपहतप्रसितप्रचारा च
नियतत्रिकालफलसन्धाननिरता च
नित्यचैतन्यलसदमृतस्वरूपा च
अपनीतनैकविधकठिनावरोधा च
विश्वमानवशश्वद भ्युदयहृदया च

कापि संस्कृतिसारणीव मन्दाकिनी
प्रवहति क्ष्मातलं पवितु मावेगेन ॥

स्रोतांसि गगनन्ति सुरलोकसरितोऽपि
चलदूर्मिगुल्मानि शरदंबुवाहन्ति
सोमन्ति मुग्धानि हेमारविन्दानि
अर्बुदा न्यंभसां बुद्बुदा स्तारन्ति
वेल्लदरविंदिनीवल्लिका श्शंपान्ति

अंहसां विलयन्ति रंहसां निलयन्ति
स्वादुतरपाथांसि स्वर्णदीस्रोतांसि ॥

नृपभगीरथकथितसागरोदन्ता च
नृपभगीरथविदितनरलोकबाधा च
नृपभगीरथविनुतनवनीतहृदया च
नृपभगीरथमित्रसागरोत्सुकिता च
नृपभगीरथसाधुनिर्दिष्टमार्गेण
नृपभगीरथविनतशिवजटाजूटेन

अवतरति भूतले मन्दाकिनी
आनन्दरसधुनी मन्दाकिनी ॥

सौभाग्यदेवतामणिमयादर्श मिव
मुक्तिकान्ताकम्रमणिमयागार मिव
आनन्दरसपरीवाह मिव पीयूष -
निष्यन्दमिव कोटिपुण्यावतार मिव
सर्वतो नीहारगिरिमिव प्रद्रुतं
द्रवरूप मधिगतं कैलासशैल मिव

अवदात मंभो वहन्ती -
अवतरति भूतले मन्दाकिनी ॥

स्वर्णदी

मुनिमानसै रिवामलतया सत्पुरूष -
गुणगणैरिव हरिणनयनप्रभाभि रिव
पूण्यभारतमातृशुंभद्यशोभि रिव
मुक्तामणिद्युतिभि रिव नवं कल्पितम्

अवदात मंभो वहन्ती - स्वर्णदी
अवतरति भूतले मन्दाकिनी ॥

सरसता मधिगतं ज्योत्स्नाप्रसार मिव
सृतिरूप मुपगतं वैदूर्यजाल मिव
जलरूप मनुगतं गिरिशाट्टहासमिव
एकत्र निष्यन्दितं द्रवीभूयैव
मवदातशारदांभोदनिकुरूंब मिव

अमृतप्रवाहं दधाना - सानन्द
मेति प्रवाहं दधाना ॥

धीरमिव शेमुषी, सूरिमिव वैदुषी,
गन्धमिव मंजरी, पद्ममिव चंचरी,
सत्कविं शक्तिरिव, तात्पर्य मुक्तिरिव
गुणगणं रीतिरिव, योगिनं सिद्धरिव,
नादमिव परकला, मोदमिव चित्कला,
स्वादमिव पात्रता, वादमिव विज्ञता

सा भगीरथमार्ग मनुयान्ती
सोत्साह मुच्चलति खेलन्ती ॥

नाडी समायाति कापि गान्धारीव
हस्तिजिह् वा कापि नाडीव समुपैति
काचि दुपसर्प त्यलंबुसा नाडीव
नाडीव समुपैति काचिद् यशस्विनी
काचि दुपसेवते पिंगला नाडीव
काचनेडेवानुसेवते नाडीच

भूमे स्सुषुम्णेव निष्यन्दिनी
ताभि स्तता भाति मन्दाकिनी ॥

उत्पतति निष्पतति संपतति परिपतति
उल्लोललीलया कल्लोलमालया
अंहसां संहतिं संहरन्तीव सा
रंहसा ढौकते बृहत्प्रवाहेन

अकति.....

नारायणस्येव करूणातरंगिणी
क्षोणीतलं पवितु मापतति वेगेन
कंपते 'झंपते' कण्डते कंचते
गल्भते गल्हते कम्रप्रवाहेन
गर्हते पापानि गोपते पुण्यानि
ग्लेषते क्षेत्राणि ग्लेवते तीर्थानि

अकति.....

सृंभति स्वर्धुनी गिरिशिलामूलानि
शतकोटिधारया निजवारिधारया
कुंभति द्योधुनी मरूभूमिखण्डानि
संभ्रमापूरेण निजवारिपूरेण

लुंबति स्वर्णदी कण्टकानोकहान्
शाततरपाथसा व्याततस्रोतसा
चुंबति वियन्नदी तीरगतवल्लरी
रत्यन्ततुंगेन निजवास्तरंगेण

अकति.....

अञ्जसाऽमृतबिन्दुकासार मवगाह्य
धाराभि रभिषिच्य केदारनाथ मपि
सरसयाऽलकनन्दयाऽऽप्तया संगता
विधिकपालक्षेत्र मालोक्य सादरं
संसारमरूखिन्नजनतामृतोदार -
कासार माम्नायसारामृतासार -
पूरमिव पुण्यावतार मिव संस्कार -
सारमिव मुक्तिकान्तामहागार मिव

बदरीकाश्रम मेति मन्दाकिनी
परमपदविरजेव मन्दाकिनी ॥

सहनरेणासुरोज्जसनार्थं मौनि -
वेषेण भासुरं विश्वात्मगोचरं
विश्वोद्भवस्थेमविलयक्रियाशौण्ड
मजरामरं शौरि मादिनारायणं
नासिकन्धयगन्धबन्धुरोदारम -
न्दारकुन्दारविन्दारनिष्यन्दिमक -
रन्दमेदुरमधुरधाराभि रभिषिच्य
रंगत्तरंगसुमृदंगसारङ्गादि -
संगीतभंगी मनुष्ठाय भक्त्या च

प्रणिपनीपत्यैति मन्दाकिनी
भक्तिरसवाहिनी मन्दाकिनी ॥

भुगभुगायितभूरिबुद्बुदव्रातेन
सिमसिमायितशीतशीकरासारेण
बुसबुसायितपुण्यपूर्णप्रवाहेन
घलघलायितकम्रकल्लोलजालेन

दन्द्रम्यते स्वेच्छया - स्वर्णदी
जंहम्यते स्वेच्छया

घुंघुमस्वनकनत्भंगभंग्या लसत् -
चकचकद्गतिलीलया - सा जवति

तकतकद्गतिलीलया -

स्फूर्छति स्फूर्जति स्फुण्डते स्फायते
प्रान्तरप्रान्तेषु गहनकान्तारेषु
स्नुह्यति क्वचिदपि स्फुर्णोति कुहवापि
स्पन्दते क्वचिदपि स्यन्दते कुहवापि

मन्दमन्दं स्त्रवति मन्दाकिनी
मन्दमन्दं जवति मन्दाकिनी ॥

क्वापिशररंहसा क्वापि रूचिरंहसा
क्वापि रवरंहसा क्वापि हृद्रंहसा
निर्भिद्य भूधरान् निर्भज्य भूरूहान्
सर्वतोमुखसंभ्रमस्फूर्तिविभ्रान्ति -

पूर्णमूर्त्या जवति मन्दाकिनी
विस्रंभतो जवति मन्दाकिनी ॥

ओजायते क्वापि मन्दायते क्वापि
विमनायते क्वापि सुमनायते -
फेनायते क्वापि गर्वायते क्वापि
हरितायते क्वापि नीलायते -

स्वेच्छया पोप्लुवा मन्दाकिनी
निस्तन्द्ररंहसा मन्दाकिनी ॥

लीलाचलीयति ग्रावसूत्तुंगेषु
लीलावनीयति प्रान्तकान्तारेषु
अन्तःपुरीयति क्षेत्रेषु तीर्थेषु
चास्थानमण्डपीयति दिक्षु विविधासु

स्वच्छन्दविभ्रमै र्मन्दाकिनी
आनन्दरसधुनी मन्दाकिनी ॥

तेपते रेपते क्षीबते शीभते
निम्नोन्नतेषु नैकेषु प्रदेशेषु
वाडते शाडते दक्षते धुक्षते
कीकसप्रायेषु दुर्गमक्षेत्रेषु
अंहते रंहते वंहते मंहते
निर्जलप्रायेषु निर्जनप्रान्तेषु

जृंभते क्वचिदपि श्वंभते कुत्रापि
श्रन्थते कर्हिचित् ग्रन्थते कुहवापि

अकति .....

शुकतुण्डहस्तोर्मिकल्पितव्यावृत्ति -
परिवृत्तिवलितोरूकोल्लसल्लास्या च
अभिमुखोर्ध्वतलोर्मिसन्दर्शनोल्लस -
न्मण्डलस्वस्तिकोल्लालसल्लास्या च
शुकतुण्डकटकाभिमुखशस्तहस्तोर्मि -
मुग्धापविद्धपरिणद्धप्रचारा च
दिक्स्वस्तिकस्वस्तिकोन्मत्तकालात -
कार्धरेचितकादिसन्दर्शनाद्या च

लासकीवायाति मन्दाकिनी
लास्यरसवाहिनी मन्दाकिनी ॥

सूच्यंचितोरूपदपार्श्वकोरस्फुरद् -
वीचिहस्तासूचिताक्षिप्तरेचिता
क्वाप्यंचितं क्वापि विनिकुंचितं क्वापि
वैशाखरेचितं क्वाप्यर्धरेचितं
भ्रमरकं कुत्रापि चतुरकं कुत्रापि
ललितं च कुहवापि वलितंच कुहवापि

अभिनयन्ती मुदा मन्दाकिनी
नृत्यति स्रोतसा मन्दाकिनी ॥

भुजगांचितं भुजगसन्त्रासितं भुजग -
संत्रस्तरेचितं सन्दर्शयन्तीव
वृश्चिकविकुट्टितं वृश्चिकविरेचितं
वल्लिकावृश्चिकं विस्फोरयन्तीव

नृत्यति स्रोतसा मन्दाकिनी
लास्यरसवाहिनी मन्दाकिनी ॥

आत्मस्वरूपसन्दर्शनोद्यतदिव्य -
सन्देशसपताकहस्तायितोर्मिणा
संयमिललामकुलसादरालोकन -
प्रसितसत्रिपताकहस्तायितोर्मिणा
दुर्भिक्षदुरितादिनिष्कासनस्फाय -
दर्धचन्द्राकारहस्तायितोर्मिणा

लासकीवावनौ मन्दाकिनी
नृत्यति स्वोच्छया मन्दाकिनी ॥

ऊर्मिणा केनापि शुकतुण्डहस्तेन
कर्तव्य मंजसा कर्मोपदिशतीव
मुंजत्तरंगेण मुष्टिहस्तेनेव
वितनोति वितततिबाधाविमुक्ति मपि
शिंजत्तरंगेण शिखरहस्तेनेव
दुष्पथप्रतिषेधसूचनां विदधाति
कटकामुखेनेव कम्रकल्लोलेन
परमात्मपूजाविधान मादिशतीव

नर्तकीवावनौ मन्दाकिनी
नृत्यति स्वेच्छया मन्दाकिनी ॥

क्षितिदेवतातर्पणोद्यमव्रतसक्त -
सर्पशीर्षायितप्लवमानसंप्लवा
क्षितिदेवतोपहारार्पणप्रस्फीत -

पद्मकोशोदंचदूर्मिहस्तभ्रमा
क्षितिदेवतापालनैकार्थसंसूचि -
सूचीमुखाभिनयचंचत्तरंगाच
क्षितिदेवताद्रोहिकंटकापाक्रिया -
पिशुनसन्दंशाभिनयदूर्मिहस्ता च

भावा नुदंचिता नभिनयन्ती
नृत्यति स्रोतसा मन्दाकिनी ॥

गिरिशिलास्फालनव्यासक्तगजदन्त -
हस्तायितोन्निद्रकम्रकल्लोला च
सागरोत्कलिकानुतापादिसंसूच -
दवहित्थहस्ताभिनयचंचदूर्मी च
रत्नाकरोपहारादानपारीण
पुष्पपुटहस्तायितोत्तुंगभंगा च
निजवल्लभोदन्वदक्षीणरसरीति -
पारायणस्वस्तिकायितोल्लोला च

भावा नुदंचिता नभिनयन्ती
नृत्यति स्रोतसा मन्दाकिनी ॥

हरिणप्लुतस्फारकम्रप्रचारा च
करिहस्तशस्तोर्मिनम्रप्रवाहा च
दण्डपादाकारपरिणमद्धारा च
प्रेंखोलितकरीतिसाचीकृतोर्मी च

लासकीवाचरति मन्दाकिनी
लास्यानि लसितानि मन्दाकिनी ॥

अधिकृतामरराजशुण्डालशुण्डाप्र -
काण्डायतोत्तुंगधारासहस्रेण
ऊर्वशीकुचकुंभशिखराग्रविच्छुरित -
चन्दनागुरूचारूबुद्बुदार्बुदकेन
रंभाप्सरोमणीगंभीरिमोदार -
नाभिविस्फारभ्रमीविभ्रमेणापि
मन्दारमंजरीशंकयेन्दिन्दिरज
रीजृंभितापाण्डुडिंडीरपिण्डेन

चण्डप्रवाहेन मन्दाकिनी
रंहसा ढौकते मन्दाकिनी ॥

क्वापि कलहंसकुलसमुपासिताभिदल -
दरविन्दमकरन्दनिष्यन्दतुन्दिला
क्वापि नन्दिविषाणकोटिपाटिततटा
क्वापि दिगिभाप्लावजर्जरितनालका
कालकासरशृंगशातकोट्त्क्षिप्त -
डिण्डीरपिण्डावलीपाण्डुरा क्वापि
क्वचि दभ्रवेदण्डतिग्मदंष्ट्रादण्ड -
खण्डितामलकुमुदखण्डाभिमण्डिता

सोत्पातनिष्पात मुच्च्चलति सा
सोच्छ्वसितनिश्वसित मुच्छलति सा ॥

सलिललीलाकेलिसंसक्तवनदेव -
ताकेशपाशप्रसूनसुरभीकृता
आश्रमागततापसाधौतवल्कलक -
षायपाटलपुण्यतीरतलपुष्करा

सोत्साह मुच्चलति मन्दाकिनी
सोत्कण्ठ मुच्छलति मन्दाकिनी ॥

अवगाहनायातकाश्मीरसुन्दरी -
कुचकुंभसिन्दूरपाटलीकृतजला
अनवरतमज्जदुन्मदशबरसुन्दरी
कुचकलशविस्फालनोल्लुलितवीचिका
अरविन्दमकरन्दमाद्यन्मिलिन्दमद -
सुन्दरीसन्दोहविहितकोलाहला
व्याकोचदिन्दीवरांभोजकल्हार -
मधुबिन्दुनिष्यन्दनिष्पन्दपिंछका

निस्तन्द्र मुच्चलति मन्दाकिनी
स्वच्छन्द मुच्चलति मन्दाकिनी ॥

उत्तुंगतारंगशीकरासारजै
रविकिरणचित्रितै रून्मिषद्भि स्सदा
सर्वतो जृंभितै रिन्द्रचापै रिव
प्रतिपदं विनिभाल्यमाना -

सा जवति

प्रतिकलं विनिभाल्यमाना ॥

ज्योत्स्नाप्रवाह मिव कर्पूरपूर मिव
मल्लिकामालतीमंजरीपुंज मिव
कामधेनुक्षीरनवनीतराशि मिव
विदधती पाण्डरं डिण्डीरमण्डलं

भागधेयेनैव चेतनानाम्
स्पन्दते भूतले मन्दाकिनी ॥

अमृतप्रसार मिव मौक्तिकासार मिव
तारकावारमिव नीहारपूरमिव
संविदानन्दरसशीकरासारमिव
परिकिरन्ती वहति शीकरासार मपि

भागधेयेनैव चेतनानाम्
स्पन्दते भूतले मन्दाकिनी

क्षितिदेवताकण्ठतारहारालीव
मुक्तिकान्ताकम्रजातिसुममालेव
ज्ञानयोगाधीशकलिताक्षमालेव
कर्मयोगाधीशकलधौतयष्टिरिव

स्रोतसा श्वेतेन मन्दाकिनी
द्योतते भूतले मन्दाकिनी ॥

बाह्यान्तरध्वान्तगगनायितानन्त
शितितरूलताक्रान्तनीलापगा क्वापि
बाह्यान्तरज्वलनदीव्यत्पराकाश -
समगैरिकाताम्रकम्रापगा क्वापि
बाह्यन्तरामितद्युतिमन्महाकाश -
संकाशताररूचिपूर्णापगा क्वापि
बाह्यान्तराहस्कराभसूर्याकाश -
नीकाशहेमाब्जरूचिरापगाक्वापि
वागतीतज्योतिरात्तपरमाकाश

संकाशडिण्डीरभरितापगा क्वापि

योग माचरतीव मन्दाकिनी
भोगिनीव स्फुरति मन्दाकिनी ॥

करूणारसस्य प्रवाहेन मोहान्ध -
कारस्य मिहिरेण सत्त्वस्य निलयेन
धर्मस्य मूलेन तपसोपि केन्द्रण
योगावतारस्य पुण्यमयतीर्थेन
पापकान्तारस्य दावानलेन परि -
तापतूलावले र्विलयवातूलेन
विषयविषवल्लरीजालस्य परशुना
ब्रम्हर्षिमकुटेन जह्नुना तनयेव

आद्दताऽत्यन्तवात्सल्येन सा
तन्मुदं कृतवती मन्दाकिनी ॥

मोद मनुबोभोति सर्वधा क्षेत्रेषु
नानन्ति पुण्यालवालेषु तीर्थेषु
दाधाति पुण्यानि तूस्तेषु देशेषु
देदिवीति स्वच्छकासारतीरेषु
मोमोक्ति कलुषाणि तोतोत्ति जाड्यानि
रोरोद्धि मान्द्यानि नोनोत्ति शैत्यानि

अभिसरन्ती प्रियं मन्दाकिनी
आनन्दरसधुनी मन्दाकिनी ॥

ऊषरक्षेत्राणि केदारयति नैक -
केदारखण्डानि सस्यसंपन्नयति

मरूभूमि मपि पूर्णकासारयति शुष्क -
सस्यानि फलयति स्वीयसारेणैव
मर्त्यखण्ड ममर्त्यखण्डं वितन्वती

मर्त्यभूमौ स्त्रवति मन्दाकिनी
मर्त्यभूमौ द्रवति मन्दाकिनी ॥

कोटियागफलानि कोटिदानफलानि
कोटिकर्मफलानि कोटिभक्तिफलानि
अमृतशीकरमात्रसंप्रसारेणैव
सकलाय मानवसमूहाय विददती

अकति......

कामधेनुक्षीरसारधाराभि रिव
मन्दारमकरन्दमधुरधाराभि रिव
विद्रवत्स्फटिकमणिकान्तिधाराभि रिव
निजपयोधारालधाराभि रंजसा

सा हृषीकेश मपि स्नपयन्ती
सागरं प्रति याति मन्दाकिनी ॥

उन्मिषन्तीषु निजधारासु सर्वत्र
सर्वतोमुखसंभ्रमेषु संपन्नेषु
अकुतोभयप्रचारेषु प्रचारेषु
निर्णिद्रविभ्रमे षूत्तुंगभंगेषु

संभावयन्तीव मन्दाकिनी
सागरंप्रति याति मन्दाकिनी ॥

स्वैरवाचालोलधूर्तपरपुष्टालि
मूर्मिमयहस्तेन सन्तर्जयन्ती च
स्वेच्छाविहारिमधुमत्तमधुपावलीं
काण्डप्रहारेण निष्कासयन्ती च
अश्रान्तमधुरागरक्तपांसुलपंक
जातनिकुरूंबकं परिकंपयन्ती च

दुष्पथप्रतिषेध मातन्वती
सागरंप्रति याति मन्दाकिनी ॥

अज्ञातहेमसुमगन्धाय सादरं
कमलामलामोदरसमाधुरीं दिशति
बहुकालमूकाय माधवासक्ताय
सहकारसंपदा वाक्प्रौढिमावहति
अमृतप्रसादेन शश्वत्प्रबोधमय -
नवकलालालितं जडजात मासौति

द्विजजात मेव माद्रियमाणा -
अभिसरति सागरं मन्दाकिनी ॥

दोद्रूयते क्वापि पोप्लूयते क्वापि
जागल्यते क्वापि लोलुद्यते -
सोस्रूयते क्वापि वेव्रीयते क्वापि
डेडीयते क्वापि चेक्षीयते -
चोकुद्यते क्वापि नानद्यते क्वापि

पारस्पन्द्यते क्वापि तात्वर्यते -

अभिसरन्ती प्रियं मन्दाकिनी
शुचिरसोदंचिता मन्दाकिनी ॥

शब्दायते क्वापि निर्झरीबृन्देन
स्पर्धायते क्वापि रंहसा श्वसनेन
कलहायते क्वापि तुंगाद्रिनिचयेन
वैरायते क्वापि गहनकान्तारेण

सा भगीरथमार्ग मनुयान्ती
लीलया खेलति स्वस्त्रवन्ती ॥

शैत्यप्रसारै स्सुगन्धप्रसारै
र्विचित्रप्रचारै र्विचित्रप्रकारैश्च
ऋजुगामिनी क्वाप्यनृजुगामिनी क्वापि
समगामिनी क्वाप्यसमगामिनी क्वापि

सानन्द मुच्छलति मन्दाकिनी
स्वच्छन्द मुच्छलति मन्दाकिनी ॥

कलहंसशिञ्जितै रोलंबगुञ्जितै
रूर्मिमर्दलतकिटधिमिकिटारभटीभि
रोंकारझंकार मापूरयन्तीव
नागांगनानृत्य मुद्भावयन्तीव
छन्दसाताललयमात्रास्वरेणेव

चन्दति स्रोतसा मन्दाकिनी
चञ्चति स्त्रोतसा मन्दाकिनी ॥

संध्यासमुद्दण्डताण्डवानण्डीर -
चण्डीशडमडमड्डक्कारवार्भटीम्
उपलनिम्नोन्नतक्ष्माकुटिलकोणेषु
दिग्गजज्वरकरी मापादयन्तीव

रंहसा स्पन्दते मन्दाकिनी
बृंहत्प्रवाहेन मन्दाकिनी ॥

विद्युत्कशाघातजर्जरितविस्फूर्ज -
दुद्दामपाथोदगंभीरगर्जितम्
प्रत्यन्तपर्वतप्रस्तरप्रस्रवज्
जलपातविभ्रमै स्संभावयन्तीव

बृंहत्प्रवाहेन मन्दाकिनी
रंहसा ढौकते मन्दाकिनी ॥

शास्त्रीयसंगीतगोष्ठीकृताभंग
रंगन्मृदंगरवभंगभंगी मपि
कर्कशस्थूलशार्करिलप्रदेशेषु
रिंगत्तरंगै स्समापादयन्तीव

निस्तन्द्र मुच्छलति मन्दाकिनी
स्वच्छन्द मुच्छलति मन्दाकिनी ॥

संगीतसंसक्तवनदेवतारब्ध -
मंजुमोहनवेणुनिक्वाणनैपुणीम्
वल्लीमतल्लीनिगुंजन्निकुंजेषु
धारालधाराभि रापादयन्तीव

मन्दते मन्देव मन्दाकिनी
स्पन्दते मादेन मन्दाकिनी ॥

मर्मरस्वरकीर्णवनदेवताहृद्वि -
पंचीप्रपंचीकृतेदंचितस्वरम्
सान्दाटवीकोटिसंबाधवीथीषु
परिवाहबृंहितै रालापयन्तीव

सानन्द मुच्चलति मन्दाकिनी
स्वच्छन्द मुच्छलति मन्दाकिनी ॥

पद्मनाभाध्मातपाञ्चजयोदञ्च -
दोंकारझंकारसान्द्रमन्द्रस्वनम्
उद्दामभूमिभृत्कन्दराकुहरेषु
तीव्रतररंहसा प्रतिनादयन्तीव

चन्दति स्त्रोतसा मन्दाकिनी
चञ्चति स्त्रोतसा मन्दाकिनी ॥

परशुरामकुठारधारेव दुरहंयु -
भूभृद्विदारणप्रक्रियापरिणता
ह् रादिनीवोत्कृत्तदुर्वृत्तभूमिभृ -
द्वातुजारूणपूरविच्छुरितधारा च

रंहसा स्पन्दते मन्दाकिनी
स्त्रोतसाऽस्थागेन मन्दाकिनी ॥

विकटकण्टतते वीरिव लोलुवा
विभ्रमक्रीडितै र्बालेव पोप्लुवा
सत्त्वेन सुमनसां सुकृतिरिव पोपुवा
रंहसा भूरूहां वात्येव दोधुवा

दन्द्रमीति स्वेच्छया - स्वर्णदी
जंहमीति स्वेच्छया -

आज्याहुतिप्रीतवैतानिकाग्नीनि
शमदमाद्यात्मसद्गुणजन्मभवनानि
वेदवेदान्तादिचर्चैकसत्राणि
विज्ञानवैराग्यभक्तिवासगृहाणि
होमाग्निखतमालपूतदिक्कुहराणि
पुण्यसन्तानानि मुनिजनाध्युषितानि
संसारमरुखिन्नमानवस्त्रोतांसि
ज्ञानरोचिर्जालदूरीकृततमांसि
आनन्दतुन्दिला न्याचारमन्दिरा
ण्यातिथ्यबन्धुरा ण्यार्जवामन्दानि

सेवमाना तपोविपिनानि सा
सागरं प्रतियाति मन्दाकिनी ॥

आम्नातिभि श्श्रुतिषु संपूजिता सती
पठितिभि श्शास्त्रेषु सुश्लाघिता सती
इष्टिभिर्यागेषु बहुधेडिता सती
पूर्तिभि र्दानेषु बहुमानिता सती

मन्दमन्दं चलति मन्दाकिनी
मन्द्रमन्द्रं जलति मन्दाकिनी ॥

उत्तालकल्लोलनिस्वानंदभेन
पारदारिकजनं सन्तर्जयन्तीच
आभ्युन्नतिकबान्धुमैत्रिकाणां कृते
प्राभूतिकी व्याधिबाधितानामेव
सौवस्तिकी स्वागातिकमौनिनां सौख
तपसिकी पापिनां माशब्दिकी सती

एव मापृच्छमाणैव सा - स्वर्णदी
मानवा नग्रतो याति मन्दाकिनी ॥

दुष्टेषु शिष्टेषु भुविजेषु दिविजेषु
अज्ञेषु विज्ञेषु पातकिषु पूतेषु

अमृतप्रसारं वितन्वती - स्वर्णदी
समदृशा मोदते भागीरथी
समदृशा मोदते भागीरथी

इरिणानि सस्यालवालानि वितनोति
कामलानपि जलाधारांश्च विदधाति
खातानि पूरयति वेशन्तवापिका -
ह्रददीर्घिकातटाकादीनि पूरयति
देवखातानि किल निपृणाति निपिपर्ति
ऊष्मालवालानि विविधस्थलान्यपि

धाराभि रंजसा मन्दाकिनी
धीराभि रंजसा मन्दाकिनी ॥

मालेषु डेडेति शैलेषु पोप्लोति
खातेषु चंचू र्त्यखातेषु चोकूर्ति
उच्चेषु चोस्कन्ति कच्छेषु चोस्कुन्ति
अरियर्ति गहनेषु वरिवर्ति कोणेषु
इरिणेषु जाहर्ति प्रवणेषु नानर्ति
जंघन्ति कूलानि चंखन्ति मूलानि

चाकर्ति शैत्यानि मन्दाकिनी
चरिकर्ति सुकृतानि मन्दाकिनी ॥

मन्दारमालेव सुमनोमनोहरा
योगीशसंविदिव नादबिन्दूद्यता
विक्षेपवृत्तिरिव कल्लोलसंकुला
प्रतिभेव नवनवोन्मेषोपलालिता
पुरुहूतनगरीव महितामृतांचिता
सुरधेनुरिव पयस्रोतःपिचण्डिला

राजते भारते मन्दाकिनी
भ्राजते भारते मन्दाकिनी ॥

आशयेनाच्छेन शुचिना गभीरेण
संभ्रमेण प्रकृतिसौभाग्यपोषिणा
त्रैकाल्यफलदायकेन प्रचारेण
जीवनेनाश्रान्तकविसेव्यमानेन

राजन्यमूर्तिरिव मन्दाकिनी
रञ्जयति भूतलं मन्दाकिनी ॥

वासयन्ती वृषं भासयन्ती त्विषं
पावयन्ती भुवं भावयन्ती जवम्
दूरयन्ती छलं पूरयन्ती बलं
शोषयन्ती रूजं पोषयन्ती निजम्

एति प्रयागं च मन्दाकिनी
मानयति माधवं मन्दकिनी ॥

रमणीययेवेन्द्रनीलोत्पलत्विषा
सामिनीलीकृता स्फटिकोपलस्थली
वामार्धमूर्तिं प्रपन्नया गिरिजया
शंभो रूपस्कृता दक्षिणामूर्ति रिव
छायामहीरूहाधस्तलनिलीनया
ज्योत्स्नातमोरेखयेव शारीकृता
समलंकृता विनीलाकाशशोभया
शारदस्तनयित्नुमालेव मञ्जुला

यमुनया संगता मन्दाकिनी
विद्योतते तरां मन्दाकिनी ॥

चिदचित्समेतेव नारायणाकृतिः
प्रभुशक्तिः रूत्साहमन्त्रशक्तियुतेव
ज्ञानशक्तिःक्रियेच्छाशक्तिकलितेव
शिवसतीविधिसतीपरिणता कमलेव
पिंगलेडांचिता ललिता सुषुम्णेव
व्युत्पत्यमन्दाभियुक्तिसमुपस्कृता
प्रतिभेव यमुनासरस्वतीसंगता

दन्द्रम्यते स्वेच्छया -　　　　　　स्वर्णदी
जंहम्यते स्वेच्छया -

कुलजातिमतरीतिगुणकर्मगतिभेद
मविगण्य सुखेन परमपद मुन्नेतु
मपुनरावृत्तये परिकल्पिताभि रिव
सोपानपंक्तिभि श्श्रितमानवावलिं
संप्लवप्लमानकांचनाचलशृंग -
तुंगकल्लोलमालाभि रूल्लालिता

काशीपुरं याति मन्दाकिनी
आनन्दरसधुनी मन्दाकिनी ॥

आम्नाय संस्कृतिप्रतिबिंब मिव धर्म
देवतालंब मिव शंभुना कल्पितं
कैलास मन्यमिव भक्तसौलभ्याय
सिद्धसाध्यार्चितं सौभाग्यशेवधिं
विविधविद्याकेलिलीलानिकेतनं
निखिलामरागारराजितं व्यासादि -
सेवितं वर्णाश्रमाचारभासितं
मुक्तिकान्ताविहाराराम मुज्ज्वलं
मणिकर्णिकाप्रभृतिपुण्यतीर्थांचितं
विश्वनाथाध्युषित मतिलोकवैभवम्

सेवमाना सती काशीपुरम्
अभियाति सागरं मन्दाकिनी ॥

कलहंसकोल्लसत्कूर्माघ्रिकम्राच

निम्नभ्रमीनाभिविभ्रमोल्लसिता च
चञ्चन्मिलिन्दरोमांवलीललिता च
सैकतनितंबा च कल्लोलहस्ता च
चङ्कनच्चक्रवाकोरोजरम्या च
पारार्थ्यरूचिकंबुकन्धरामहिता च
सद्योविकस्वरांभोजातवदना च
मीनदृङ्मधुरा च नववेणिकलिता च

अतिलोकसौन्दर्यमूर्तिरिव सुरनदी
सागरप्रेयसी जगति देदीप्यते ॥

अम्युद्गताभि रंभोधिदूतीभिरिव
काभिश्चि दर्चिताकाभिश्चि दावृता
काभि रालिङ्गिता काभिरपि लालिता
कल्लोलिनीभि रभिसरति मन्दाकिनी
सागरकुमारैकशृङ्गारवाहिनी

अकति.......

कल्लोलपूर्णयामलजीवनाढ्यया
भुवनमहिताशयस्निग्धया मुग्धया
ऊर्मिकाकङ्कणक्वणितप्रचारया
कोसलागतया सरय्वा वयस्यया

मिलितासती याति मन्दाकिनी
सागरप्रेयसी मन्दाकिनी ॥

कौशिकीगण्डकीगोमतीकर्णालि -
कैरावतीसरिन्निजसखी राश्लिष्य
कूलमुद्रुजरसै रतिचित्रविभ्रमै

स्तिर्यगाकुञ्चितैः कल्लोलपाणिभिर्
नृत्य मातन्वतीं ब्रह्मपुत्राभिधां
निरवद्यहृद्यप्रचारै र्विहारिणीं
स्फारचारूदारचारिमापूरितां
तटिनीमतल्लिकां प्रियसखी मालिंग्य

दन्द्रमीति स्वेच्छया - स्वर्णदी
जंहमीति स्वेच्छया -

काञ्चनद्युतिलसत्कलमादिमंजरी -
रंजितोदारकेदारविभ्राजिताम्
कम्रकलविंकादिसन्धूननोदग्र
कृषिकांगनाक्रोशकोलाहलांचिताम्

उभयपाश्र्वावनीं सिंचन्ती
मन्दमन्दं स्त्रवति मन्दाकिनी ॥

कृषिकर्मसु स्वयंश्रान्तस्य शान्तस्य
विश्वक्षुधाहरणदीक्षाधुरीणस्य
मानवश्रेयोविधानैकतानस्य
देशप्रधानस्य सर्वप्रियस्यापि
मन्थरै स्सुरभिलै श्शीतलै श्शीकरै
श्श्रमताप मपनीय सम्मदं सन्धाय

उत्साह मातन्वती - सा याति
नवशक्ति मातन्वती -

तुन्दपरिमृजमनुजमान्द्यपरिहारिणी
नाथहर्यूढहलहालिकोल्लासिनी

शोकापनोदजनशोकापनोदिनी
कुक्षिंभरिव्रातकुल्मलोन्मूलिनी

अकति.....

धिषणाविशेषमपि दीपयति हस्त्रेषु
संविदं भासयति सिध्रेषु मीध्रेषु
दुर्भाव मपहन्ति रिष्वेषु चर्षणिषु
भक्ति मंकूरयति पाषण्डचेतस्सु
वर्वरेषु ज्ञानशक्ति मातञ्चयति
मर्मरीकेषु सच्चारूतां वितनोति

अमृतरसवाहिनी मन्दाकिनी
आनन्दरसधुनी मन्दाकिनी ॥

सामिधेनीद्यूनसंचाय्यपरिचाय्य -
सांनाय्यतृप्तर्भुतोष्टूयमाना च
सत्वर मजर्य मपि संगतं स्वर्धुनी
सागरेणेहते सस्मिता सरसेन

अकति......

अश्रान्तसीधुमदरक्तांबकास्पृश्य -
मातंगकुलजातपंकमपनेतुमिव
विषदताधोगतिप्रायन्महाहीन -
दुर्वारभारमपि भूयोपहर्तु मिव
रौरवाधिष्ठानभीकृत्प्रपातका -
धिकविषमगोत्रसम्मर्द मपहर्तु मिव

विहरति क्ष्मातले मन्दाकिनी
पुण्यप्रचारेण मन्दाकिनी ॥

वर्णाश्रमाचारनियमैकनिरतानि
सन्तताभ्यागताराधनाभिरतानि
मात्सर्यविद्वेषमायाविदूराणि
सौहार्द सौशील्य सौजन्यतीराणि
वेषभाषाटोपवंचनाहीनानि
सत्यधर्मन्यायसाधुताधीनानि

उपवर्तनानि भुवि मन्दाकिनी
नूत्नानि निर्माति मन्दाकिनी ॥

कारुण्यपूर्णानि कान्तिसंकीर्णानि
धनधान्यकेन्द्राणि दातृतासान्द्राणि
सुखशान्तिकलितानि सौन्दर्यललितानि
मनुमतोपेतानि घनतानपेतानि
सत्कलाकम्राणि सारल्यनम्राणि
संस्काररम्याणि सभ्यताहर्म्याणि
प्रगतिनिस्यूतानि पशुधनस्फीतानि
बहुवृत्तियुक्तानि बहुशक्तिपृक्तानि

उपवर्तनानि किल नैकानि सा
रंजयन्ती याति मन्दाकिनी ॥

मण्डके प्रस्तरे विश्वकर्माभिधे
देवराजे नित्यमंगले मंगले
विश्वेशकैलासपूर्वमुखबाहुलिक

संज्ञिते ष्वन्येषु ग्रामेषु नैकेषु
शबराहितुण्डिकव्याधमीनाजीव -
वागुरिककटकारवनचरस्थानेषु
सुखसम्मदाभ्युदयशान्तिसंपूर्णनि
श्रेयांसि भूयांसि सन्धाय सन्धाय

अमृतप्रसारेण मन्दाकिनी
रंजयन्ती याति मन्दाकिनी ॥

सर्वतोभद्राणि विश्वेशभद्राणि
कार्मुकस्वस्तिकश्रीप्रतिष्ठानानि
बलिदेवदेवाष्टमुखवैजयन्तानि
गिरिगुहाजलपद्मराजधान्याख्यानि
निगमनन्द्यावर्तचतुराननाह्वानि
स्वस्तिकद्रोणकप्रभृतीनि विविधानि
नगराणि सन्तुष्टपौराणि विज्ञान -
भवनानि धनधान्यकेन्द्राणि वितनोति

अमृतप्रसारेण मन्दाकिनी
आनन्दरसधुनी मन्दाकिनी ॥

सिंहलोचनवारूणाह्वानि तुंगानि
माहेन्द्रसर्वतोभद्रनन्दाख्यानि
वज्राक्षशत्रुघ्नशाकटोपाह्वानि
भूमिभृद्दुर्गाणि वैरिदुर्धर्षाणि
बहुसरित्कासारपल्वलसमृद्धानि
वारिदुर्गाणि भूदुर्गाणि चान्यानि

अमृतप्रवाहेन मन्दाकिनी
पोषयन्ती याति मन्दाकिनी ॥

कर्पूरकाश्मीरचन्दनागुरूचारू -
परिमलावहधूपदीपै रूपार्चिता
वनिताभि रभिमानकलिताभि रकलंक -
चरिताभि रतिभक्तिभरिताभि रञ्जसा
श्रेयांसि सौभाग्यसंपन्महीयाँसि
प्रेयांसि ताभ्योपि भूयांसि विददाति

अमृतोर्मिपाणिभि र्मन्दाकिनी
आनन्दरसधुनी मन्दाकिनी ॥

गेष्णवो गायन्ति देष्णवो दीव्यन्ति
अप्तव श्शुच्यन्ति यातव स्सुख्यन्ति
मरवोऽपि सुफलन्ति भरवोऽपि पूषन्ति
यजताः प्रसीदन्ति दुरमता लुप्यन्ति
वंचथाः क्रन्दन्ति वन्दता नन्दन्ति
वर्वरा स्तृप्यन्ति गर्वरा स्सीदन्ति
भाग्यानि पुष्यन्ति तस्याः प्रचारेण

साश्नीतपिबतं च कतिपये विलसन्ति
सैहिरेयाहिरं चङ्गन्ति केचिदपि
साहमहमिकमेव कतिपये धावन्ति
सुरसरिति मानवा अवतरन्त्यामेव ॥

बालकाः खेलन्ति बालिकाः केलन्ति
विलसन्तियूनोपि युवतयो नृत्यन्ति
हृष्यन्ति कर्मठा जठराश्च तुष्यन्ति
सह्यन्ति मानिनो मौनिन स्सुह्यन्ति
चन्दन्ति कार्मिकाः कर्षका नन्दन्ति
तूषन्ति पामराः पण्डिताः पूषन्ति
आबालगोपाल मारादिवालोक्य्
क्षुत्पिपासाकुला मनुजा मुदं यन्ति

संप्लुष्यदंहासि संपुष्टरंहांसि
संपूतपाथांसि स्वर्णदीस्रोतांसि ॥

मालिकान् लेपकान् वर्धकीन् सौचिकान्
शौल्बिकान् नापितान् तन्तुवायानपि
कुंभकारान् चित्रकारान् कलादांश्च
चर्मकारान् लोहकारान् पराचितान्
शौण्डिकान् निर्णेजकान् अजाजीविनः
कौटिकान् जालिकान् भारिकान् पुल्कसान्
आहितक्रीतदासादिमान् भृतकांश्च
श्रमजीविनो जनान् दुर्विधान् दुर्गतीन्

अमृतं प्रदादाय कल्लोलपाणिभी
रञ्जयन्ती याति मन्दाकिनी ॥

प्रायशोऽनुप्त्रिमस्वादुफलभोजिन
स्सर्वधाऽभृत्रिमैकानुजीविव्रजान्
सर्वदाऽसंस्कृत्रिमांबरान् दत्रिम -
स्वानुचरसम्मदान् स्वविहित्रिमक्रिया -

कर्मठान् उद्धमा नास्यस्वनानांच
स्वैरं मधूनां समुद्धया नुद्धतान्
पारयान् श्रमकर्म कर्तुमपि, धारयान्
दात्त्रादिसाधनाना मप्युदेजयान्
क्रूरसत्वावले, रविरतं चेतयान्

व्रातीनसंघांश्च परिपुष्णती
सागरं प्रतियाति मन्दाकिनी ॥

पनसासु विहरन्ति तृणसासु विलसन्ति
बिलसासु बिन्दति बुससासु दोलन्ति
नडसासु नन्दन्ति फलसासु फक्कन्ति
शुचिशीतपाथांसि सुरनदीस्त्रोतांसि
इरिणेषु दुष्टूषदोषालि मपनीय
साराणि सुष्ठु कृषिसाराणि विकिरन्ति
उच्चावचानि किल कलमादिवलजानि
सस्यसंपन्नानि साधु संस्कुर्वन्ति
धन्वसु व्याकीर्णनादेयशादेन
काश्मीरकेदारखण्डानि निर्मान्ति

शस्यसस्यश्यामला मेव कुर्वन्ति
सर्वंसहा मिमां सुरझरीस्त्रोतांसि ॥

व्रीहिलां हिन्वन्ति शालिलां जिन्वन्ति
माषिला मुर्वरां यविलां च पिन्वन्ति
जोनालभूमिमपि सूर्क्षन्ति पाथसा
कांगवीनावनीं करूणया निन्वन्ति
श्यामाकतोक्मादिसस्यानि पुष्णन्ति
कुल्माषगोधूमचणकानि धिन्वन्ति

गड्ंगापगाझरा मारवीं भूमि मपि
स्वच्छन्दविभ्रमै रूर्वरां कुर्वन्ति
स्फुटितानि कीकसाकुलितानि वल्मीक -
कीर्णानि दीर्णानि निम्नोन्नतानि च
शर्कराशीर्णानि प्रस्तरच्छन्नानि
कुत्सिता न्यूषरा ण्यवटावकीर्णानि

क्षेत्राणि विविधानि शोधयन्ती
धाराभि रूल्लुसति मन्दाकिनी ॥

शुक्लासु मधुरासु कुशगुल्मगूढासु
घृतगन्धिभूमीषु प्रोक्षति स्वच्छांबु
रक्तासु कटुकासु शरपरिव्याप्तासु
हरितासु तिक्तासु कुशकाशकलितासु
अन्नगन्धीलासु वारि प्रसारयति
कृष्णासु तुवरासु बहुतृणच्छन्नासु
मद्यगन्धीलासु वारि प्रसारयति

कल्लोलपाणिभि र्मन्दाकिनी
हिल्लोलपाणिभि र्मन्दाकिनी ॥

तुहिनवल्लुलितानि बृंहन्ति कानिचित्
कानिचित् स्फायन्ति करकवत् स्थूलानि
स्फटिकवत् विलसन्ति पाण्डूनि कानिचित्
कानिचित् तारवत् कम्राणि राजन्ति
मुक्तालिवद् भान्ति मुग्धानि कानिचित्
कानिचिद् बोभुवति काशवत् कनलानि

शैत्यप्रसारैकशीलानि लोलानि
द्योधुनीकल्लोलतुन्तुर्पजालानि ॥

इङ्गन्ति रिङ्गन्ति वङ्गन्ति वल्गन्ति
शाखन्ति फक्कन्ति गङ्गांबुचक्राणि
म्लेटन्ति शौटन्ति कुण्ठन्ति लुण्ठन्ति
कुड्डन्ति चुड्डन्ति गंगांबुचक्राणि
पर्पन्ति सर्पन्ति सिंभन्ति शुंभन्ति
कर्जन्ति गर्जन्ति गंगाबुचक्राणि

स्तायन्ति दायन्ति संसारसीमानि
पायन्ति वायन्ति पापानि बहुलानि
कुन्थन्ति पुन्थन्ति कर्माणि कुटिलानि
तक्षन्ति शिक्षन्ति दौर्भाग्यजालानि

संप्लुष्यदंहांसि संपुष्टरंहांसि
संपूतपाथांसि स्वर्णदीस्रोतांसि

कुडुपवद् घोषन्ति कुटिलेषु कोणेषु
करडवत् कायन्ति कठिनासु भूमीषु
कुहणव न्निनदन्ति गोत्रप्रपातेषु
खुत्तानि कुर्वन्ति खुल्लेषु कुहरेषु
नारहाटं दधति नारङ्गभरिमासु
जञ्जनी र्जनयन्ति झाटेषु जटिलेषु

गुंजन्ति गंगांबुचक्राणि वक्राणि
रञ्जन्ति गंगांबुचक्राणि वक्राणि ॥

अमृतानि वर्षन्ति विविधेषु कुसितेषु
मरूमरूकव्रात मञ्जसा सिंचन्ति
वीराणा न्युलुपानि विविधानि रक्षन्ति
कुब्राणि कमनीयचुब्राणि पुष्णन्ति
उल्लसन्नाकसरिदुल्लोलजालानि
मुल्लल्लेखसरिदुल्लोलजालानि ॥

माद्यन्ति मेद्यन्ति माध्वीकवाटीषु
मिन्दन्ति मेदन्ति माधूकवीथीषु
केलन्ति खेलन्ति कन्दोटकूटेषु
पूषन्ति तूषन्ति पुण्ड्रेक्षुवेलेषु
पीवन्ति मीवन्ति पिण्डखर्जूरेषु

मञ्जन्नभोनदीमञ्जूर्मिगुल्मानि
रञ्जभोनदीमञ्जूर्मिगुल्मानि ॥

कायन्ति गायन्ति कर्पूरकदलीषु
द्रायन्ति रायन्ति दाडिमारामेषु
चन्दन्ति नन्दन्ति मन्दारमालासु
सह्यंति सुह्यंति सारमाकंदेषु
स्निह्यंति नह्यंति सैरीयवाटीषु
रञ्जंति गुञ्जंति कञ्जातकुञ्जेषु

मञ्जन्नभोनदीमंजूर्मिगुल्मानि
रंजन्नभोन्नदीमंजूर्मिगुल्मानि ॥

स्त्यान्ति शायन्ति सकलासु सिकतासु
धावन्ति मीवन्ति दन्तुरप्रान्तेषु

शेलंति शीलंति शैलमयभूमीषु
सायंति जायंति संकीर्णकोणेषु
कर्दंति नर्दंति कांतारकोटीषु

मंजन्नभोनदीमंजूर्मिगुल्मानि
रंजन्नभोनदीमंजूर्मिगुल्मानि ॥

गर्जन्ति जर्जन्ति घनगण्डशैलेषु
स्फूर्जन्ति धर्जन्ति भूमिभृत्पादेषु
धन्वन्ति चेन्वंति धन्वप्रदेशेषु
स्फूर्च्छंति हूर्च्छंति स्वच्छेषु कच्छेषु
गर्वंति गूर्वंति गंगाबुसरणानि
गंजंति गृंजंति गंगांबुसरणानि

कानिचिन् मातुमिव कुलपर्वतोत्सेध
मवचेतुमिव कानि गगनद्रुमसुमानि
प्रष्टुमिव कानिचित् परिवहक्षेम मपि
कानिचावरणांबुशीकरा नानेतु
मभ्रहर्म्यारोहणानीव कानिचित्
कानिचि च्चड्गंति पेत्व माक्रष्टुमिव

गण्डशैलोत्पतत्कल्लोलजालानि
चण्डशैलोत्पतत्कल्लोलजालानि ॥

अर्दंति नर्दंति गड्गाबुचक्राणि
कर्दंति कूर्दंति गड्गाबुचक्राणि
क्रदंति नंदंति कल्लोलजालानि
त्रंदंति चंदंति कल्लोलजालानि
अंगंति वंगंति सौवरस्रोतांसि

त्वंगंति रिंगंति सौवरस्रोतांसि
कुंचंति वंचंति जलबिंदुबृंदानि
चंगंति त्वंगंति जलबिंदुबृंदानि
श्रथ्नाति कुथ्नाति मृड्नाति मृद्नाति

शांतरसवाहिनी मन्दाकिनी -
आनन्द रसधुनी मन्दाकिनी ॥

ऋध्नोति दभ्नोति धृष्णोति तिग्नोति

अमृतसरवाहिनी मन्दाकिनी -
आनन्द रसधुनी मन्दाकिनी ॥

मत्तमातंगवत् त्वंगंति कानिचित्
कानिचित् परिभीत हरिणव च्चंगंति
दृप्तपञ्चास्यवद् दृंजंति कानिचित्
कानिचित् गंर्जंति घोरशार्दूलवत्
उत्खातनंदिव न्नर्दंति कानिचित्
कानिचित् कर्दंति दुर्वृत्तघोणिवत्

उपलासु गण्डेषु गर्तेषु शैलेषु
कूलेषु मालेषु कल्लोलजालानि ॥

मंदमारूतपोतमन्देरितांभोज -
संपतत्पांसुसंपृक्तेव विस्फुरति
सरससारसपात्रमधुरासवास्वाद -
मदमत्तचित्तेव माद्यति स्वर्धुनी

माधवप्रियसुखावहसत्रशालासु
परमेष्टफलरसास्वादतृप्ताकृतिम्
प्रतिकलश्रुतिहिताव्याजानुलापेन
कल्याणकरशाखिकांचलोदंचितैः
केसरार्द्राक्षतै स्संभावयन्तीं च

द्विजजातिमपि समाद्रियमाणा -
अभिसरति सागरं मन्दाकिनी ॥

आम्रादिफलजालकम्राणि कानिचित्
कानिचिद् वल्कलक्षौमाभिपूर्णानि
चन्दनागुरूपांसुचारूणि कानिचित्
कानिचित्कमनीयहेमपुष्पाद्यानि
वनदेवतार्पितस्वर्णपात्राणीव
सान्द्रलवालानि संस्पृशन्ती मुदा

कल्लोलपाणिभि र्मन्दाकिनी
अभिसरति सागरं मन्दाकिनी ॥

भ्रमरकातिस्फुरन्महिलालिमञ्जुलां
पत्ररेखाँचितश्यामाविभासुराम्
कंकणावलिकम्रपद्मिनीभासितां
गन्धबन्धुररक्तपल्लावालंकृतां

वननगरसुश्रियं पश्यन्ती
सागरं प्रति याति मन्दाकिनी ॥

आपाटलाशोकमुकुलदीपार्चितां
हेमसुमरेणुमयकुंजमंजुलगृहां

अभ्रङ्कषस्निग्धसालाभिलालितां
कलकण्ठिकाविहितसंगीतशालिनीं
माद्यन्मयूरमणिमधुरलास्यांचितां
पृषदश्वनिध्मातचारूवंशस्वरां

कमनीयवनपुरीं पश्यन्ती
सागरं प्रति याति मन्दाकिनी ॥

तुहिनावगण्ठितावृतकोरकस्तनीं
भासुरा मतिचित्रपत्रभङ्गश्रिया
दक्षिणश्वसनसौरभ्यसंसारिणीं
पल्लवारात्रिकै र्नीराजयन्तीं च

रञ्जयन्तीं लतावनितालिम्
सागरं प्रतियाति मन्दाकिनी ॥

वल्लरीवनिताभि रादरा दर्पितं
सुमकलशसंचितं स्वादयन्त्यासवम्
क्षितिरूहां शाखासु पक्वानि सुफलानि
कल्लोलपाणिभि र्लीलयाऽऽददतीव

प्रकृतिसौभाग्य मभिनन्दन्ती
सागरं प्रतियाति मन्दाकिनी ॥

मलयमरूदवनमितचूडाभि रेलादि -
वल्लीमतल्लीभि रभिवाद्यमानेव
क्षितिधरौषधिरसव्यतिकरस्वच्छांबु -
निर्झरीभिस्सदा संसेव्यमानेव
श्रुतिमधुरगीतिभि श्शुकमुखै र्द्विजगणै

स्सत्रशालाश्रितै र्जेगीयमानेव
वनदेवतादत्तसुकुमारकुसुमास
वरसेन मधुरेण संप्रीयमाणेव

वनकृतातिथ्य मभिनन्दन्ती
महिषीव सा याति मन्दाकिनी ॥

मलयमरूदवकीर्णकम्रकेतकगलित -
परिमलावहपांसुपिष्टातकांचिता
उत्तालसालमणिशाखाकरोन्मुक्त -
सुकुमारकुसुमोपहारोपलालिता
पद्मिनीमणिचारूमधुकरश्रुतिमधुर
झंकारसुस्वागतस्वरविकस्वरा

वनकामनीयकं पश्यन्ती
सागरं प्रति याति मन्दाकिनी ॥

सतमालहिन्तालकृतमालतालानि
वरूणवंजुलवकुलवानीररूचिराणि
पाटलासप्तलामहिलालिभरितानि
मन्दारमाकन्दबन्धूकसान्द्राणि
काकेन्दुपिचुमन्दवन्दिनीरून्द्रणि
प्रियतया विविधानि विपिनानि पुष्णती

राजते भूतले मन्दाकिनी
भ्राजते भूतले मन्दाकिनी ॥

ब्राह्मीषु माषपर्णीषु हैमवतीषु
फलिनीषु पद्मासु बदरासु चित्रासु

छत्रासु गुन्द्रासु मुस्तासु सुषवीषु
काकनन्तीषु नवहिलमोचिकास्वपि
यवसेषुसौगन्धिकेषु पालन्घेषु
गर्मुत्सु नलदेषु काशेषु पौरेषु

तूलशय्यास्विव व्यालुठन्ती
क्रीडति स्वेच्छया मन्दाकिनी ॥

किट्टालवालुकाकलिलेषु कनलेषु
क्रिमिशैलकुटिलेषु कामलेष्वखिलेषु
केकावलालापकोलाहलावेल -
कल्लोलगुन्दलैः किलकिलां कुर्वती
आवर्तकुटिलेन व्यावर्तजटिलेन
गड्गोललितेन गन्डोलकलितेन
विभ्रमोज्ज्वलितेन संभ्रमोच्चलितेन
पाथोविशालेन स्त्रोतसां जालेन

स्वर्णदी -

दन्द्रम्यते स्वेच्छया -
जंहम्यते स्वेच्छया ॥

वेपेषु सस्यानुरूपेषु तापदुर -
वापेषु विस्फीतवापे ष्वनूपेषु

स्त्रोतोभि रञ्जसा मन्दाकिनी
संक्रीडतेतरां मन्दाकिनी ॥

चड्गेषु कूपाड्गपुड्गेषु मातड्ग -
तुंड्गेषु सारड्गसंड्गेषु शैत्यप्र -
संगेषु रिंगत्पलांगेषु संगीत

रंगेषु रंगत्तरंगेषु गांगेषु

धर्माधिदेवता रंरम्यते
कर्माधिदेवता बंभ्रम्यते ॥

अरणेषु कङ्कणाभरणेषु कारूण्य -
शरणेषु साधुतादरणेषु तरूणेषु
करूणेषु मान्यतावरणेषु धर्मवि -
स्फुरणेषु वारिनिस्सरणेषु वरूणेषु

औदार्यदेवता संपद्यते
सौन्दर्यदेवता लालस्यते ॥

ललितेषु वैचित्र्यकलितेषु धारोप -
वलितेषु शीकराकुलितेषु दलितेषु
तलिनेषु सुमपांसुमलिनेषु समुपात्त
नलिनेषु कलनया पुलिनेषु खेलति

झंपैकशीलया शंपाविलोलया
पंपाविशालया लंपोर्मिमालया

अकति.....

धीरासु निर्मृष्टतीरासु कीलाल -
धारासु करवालघोरासु सृमरासु
लघुतरङ्गै रियं गुरूतरङ्गै स्साऽपि

लास्यानि व्यातन्वती -
दश्येव चञ्चूर्यते

सुरनदी

वलितेषु सरिमोपचलितेषु निम्नोप -
लुलितेषु कंकणाकुलितेषु पाथस्सु
शिशिरिमासारेण शीकरासारेण

अद्धा पनीपद्यते - संभ्रमै
रिद्धा पनीपत्यते -

धाटीषु पुण्यपरिपाटीषु वात्सल्य -
बाटीषु सौहार्दपेटीषु धुतपाप -
कोटीषु वैशद्यवाटीषु कृषिकर्म -
चेटीषु रयविजितघोटीषु विजयेन

वीररसमूर्तिरिव मन्दाकिनी
संपनीपद्यते सर्वात्मना ॥

धूर्तेषु भीतकैवर्तेषु सन्दीर्ण -
गर्तेषु संभ्रमोद्वर्तेषु हिततृणा -
वर्तेषु धुतनन्दिवर्तेषु कलिदुर्मु -
हूर्तेषु वक्रतापूर्तेषु नानावि -
वर्तेषु पापसंवर्तेषु विस्फूर्ति -
मूर्तेषु बृंहदावर्तेषु वार्तेषु

कुटिलता मावहति मन्दाकिनी
जटिलता मावहति मन्दाकिनी ॥

वीचीषु नृत्यद्गवाचीषु दीव्य
न्मरीचीषु संचलद्रेचीषु झंझावि
पंचीषु सिक्तहेलंचीषु कारूण्य -

सूचीषु संपृक्तरोचीषु सन्दीर्ण -
माचीषु रंहस्समीचीषु पुण्यस -
ध्रीचीषु बिभ्यत्तिरश्चीषु शीर्यत्त -
लाचीषु सन्धुत घृताचीषु सौवासु

औदार्यसंपदा शोशुभ्यते
सौन्दर्यसंपदा मोमुद्यते ॥

पूरेषु कर्पूरपूरेषु धर्माव -
तारेषु पापप्रतारेषु भूतार -
हारेषु संविद्विहारेषु पीयूष -
सारेषु पूर्णकासारेषु वीचिका -
धारेषु पूतप्रचारेषु पुण्योप -
चारेषु सारेषु -

सर्वात्मना भाति मन्दाकिनी
शर्वात्मना भाति मन्दाकिनी ॥

कुन्देषु शीर्णतृणकन्देषु मुग्धमा -
कन्देषु मञ्जुमुचुकन्देषु दीर्णपिच -
मन्देषु मधुकरानन्देषु मधुरार -
विन्देषु नैककुरुविन्देषु मञ्जुका -
लिन्देषु जीर्णपालिन्देषु रञ्जत्पु -
लिन्देषु लोलच्छिलिन्देषु भन्देषु

वीचीकरै र्वारि मन्दाकिनी
प्रोक्षिपति सादरं मन्दाकिनी ॥

ऊषेषु बीजसंप्लोषेषु सन्ताप -
कोषेषु दुर्भिक्षपोषेषु कलुषेषु
निस्सारतादोष मपनीय पाथसा
सस्योदयाधारसाराणि संकिरति

कल्लोलपाणिभि र्मन्दाकिनी
हिल्लोलपाणिभि र्मन्दाकिनी ॥

स्फायते क्नूयते शाद्वलप्रान्तेषु
प्ययाते तायते समतलप्रान्तेषु
स्तंभते जंभते कुटिलासु भूमीषु
शल्भते गल्भते सरलासु भूमीषु
हिण्डते हुण्डते विषमासु भूमीषु
कण्डते चण्डते कठिनासु भूमीषु
ढौकते क्वचिदपि द्राघते कुहवापि
ध्रेकते क्वचिदपि ष्वक्कते कुहवापि

अकति....

मण्डलीः कुर्वती मन्दाकिनी क्वापि
मेदिनीमानिनीमणिमेखलीयति
कच्छान् निपिप्रती गगनापगा क्वापि
ललितावनीफाललालाटकीयति
साराणि सुवती च सौरी नदी क्वापि
केदारभूसतीग्रैवेयकीयति

पारयन्ती मरूं भागीरथी क्वापि
दिग्वधूकटितटीदिव्यांबरीयति

अकति.....

उल्लोलकल्लोलचेलदोलावलिभि
रालोलयन्तीव संलालयन्तीव
कलहंसकारण्डचक्रवाकादीनि
लीलाशकुन्तसन्तानानि सादरं

मन्दमन्दं वहति मन्दाकिनी
मन्द्रमन्द्रं वहति मन्दाकिनी ॥

सर्वमूलाधारसर्वसंहागता
पावनाधिष्ठानशुचिकलालालिता
मणिपूरसुषमांबुधारासमंचिता
सन्ततानाहतश्वसनोपसेविता
अतिविशुद्धाकाशभासुरच्छाया च
परिणताज्ञामोदलसदन्तरङ्गा च
सकल मपि समतीत्य सन्तता कुलपथं
दीव्यत्सहस्रारसारसामुदिता च

संविन्नदीव सा मन्दाकिनी
अमृतसागर मेति मन्दाकिनी ॥

उदयाचलोदिताहिमधामबिंबाभ -
पद्मरागावलीलालालिता क्वापि
दाडिमव्याकोचमंजुसुममंजरी -
पुंजाभसौकन्धिकोद्दीपिता क्वापि
मदमत्तकोकिलालोचनद्युतिरक्त
कुरुविन्दसन्दोहसन्दीपिता क्वापि
सद्योनिकृत्तयुवशशमांसनीकाश
नीलगन्धिव्रातविद्योतिता क्वापि

पद्मरागप्रभानिष्यान्दिनी
सा याति सागरं मन्दाकिनी

दुर्णिरीक्षाभानि कोरकाकाराणि
विशदानि कानिचि न्नवकिसालाभानि
कानिचि न्नीलानि नैकानि वज्राणि
केकिपिञ्छाभानि शैवालसदृशानि
दूर्वांकुराभानि खद्योतकम्राणि
शुकगरूद्दीप्राणि नवशिरीषाभानि
नवहरिन्मञ्जूनि मरकतानीकानि

मनुजलोकाय सा वितरन्ती
सागरंप्रति याति मन्दाकिनी ॥

पाषाणमृद्गर्भपटलभिन्नत्रास -
रक्तशीकरदोषरहितानि सुहितानि
नीलालकाभहरिनीलानि वंशांकु -
राभानि नवमहानीलानि विमलानि
कृष्णविष्णुक्रान्तनवकुसुमकम्राणि
नीलोपलानि तान्यसमानि सुषमाणि

मनुजलोकाय सा वितरन्ती
सागरं प्रति याति मन्दाकिनी ॥

भूतादिदुर्ग्रहापाकरणशीलानि
दुष्प्रयोगव्यथानिरसनव्यग्राणि
सौभाग्यशरणानि सौन्दर्यभरणानि
सकलकल्याणैकतानानि तरूणानि
अन्धकारोज्ज्वलन्मार्जारदृक्त्विंषि

रूचिराणि निरवद्यवैदूर्यजालानि

वनिताजनाय सा वितरन्ती
सागरंप्रति याति मन्दाकिनी ॥

अरविन्दमकरन्दशीकरोदाराणि
गुरूदेवताकानि पुष्यरागाण्यपि
परिशुद्धगोमूत्रमञ्जुवर्णाद्यानि
श्रेथःप्रदानि गोमेधिका न्यमलानि
वीतगोमलमलिनजर्जरकदोषाणि
शुकतुण्डकुरूविन्दवटबिन्दुरूड्ंमुंषि
ललितप्रवालमणिपटलानि पटुलानि
कल्लोलपाणिभि र्मुहु रूत्किरन्ती च

अभिसरति सागरं मन्दाकिनी
कारूण्यरसधुनी मन्दाकिनी ॥

कुक्कुटाण्डोपमा न्यंभोदगलितानि
दुर्निरीक्षप्रभापिहितानि कानिचित्
गुञ्जारूणानि विषहारीणि हारीणि
चाशीविषस्फटास्रस्तानि कानिचित्
पक्वविमलामलकरूपाणि मत्तेभ -
कुंभतलगलितानि वलितानि कानिचित्
विकचप्रियालुसुमसदृशानि कान्तार -
गलितानि सम्मोहनाभानि कानिचित्

मुक्ताफलानि सा मन्दाकिनी
आहरन्ती याति मन्दाकिनी ॥

बदरीसमानानि सिन्दूररूचिराणि
भूदारदंष्ट्राप्रसूतानि कानिचित्
पारावताण्डसंकाशानि नवकंबु -
जातानि जनतादुरापाणि कानिचित्
माषोपमानि नवतारोज्ज्वलानि वर -
वंशोद्भवानि शुभदायीनि कानिचित्
मल्लिकाकलिकावदातानिघनमीन -
जातानि नवकान्तिपूतानि कानिचित्

मुक्ताफलानि सा मन्दाकिनी
आहरन्ती याति मन्दाकिनी ॥

क्षेत्राणि जातानि कानिच स्थानानि
वारिणा पूर्णानि धन्वानि कानीति
काश्मीरकेदारखण्डानि जातानि
कानि सस्यश्यामलानि संपन्नानि
कानि परिणम्राणि काननोद्यानानि
नवधान्यकेन्द्राणि कानीति जातानि
तापदुर्भिक्षादिदूराणि कानीति
सुखशान्तिमयकला लालसीति क्वेति

समवेक्षमाणेव भूमीतलम्
मालान्यधिष्ठाय सा भासते ॥

ओजःप्रसादमाधुर्यार्थदीप्तिभिर्
द्दतिसमाधिश्लेषसंक्षेपविस्तरै
र्गतिरीतिसौकुमार्योर्जितप्रौढिभि
स्सम्मितोदारगंभीरताकान्तिभिः
प्रेयस्सुशब्दतासमतादिभि स्सौव -

मूर्तिमत्तांचितैर् हृदयङ्गमै र्गुणैः

काव्यसंपत्तिरिव समलंकृता
जग दिदं रञ्जयति मन्दाकिनी ॥

तरूणरमणीव दुत्कलिकाकुला भाति
विरहविधुरेव विसवलयोपलालिता
भारतीदेवीव परहंससेविता
लोकमातेव हेमारविन्दाञ्चिता
स्मरवैजयन्तीव मकरराजाश्रिता
पार्वतीदेवीव भवभूतिभासिता
वनभूमिरिव पुण्डरीकोपशोभिता
परमात्ममूर्तिरिव लोकमात्रंचिता

राजते विष्टपे मन्दाकिनी
भ्राजते विष्टपे मन्दाकिनी ॥

पद्माञ्चितानि बहुजीवनोल्लसितानि
राजहंसाद्यानि कमलाकराणीव
सुमनस्समृद्धानि शुकसूक्तिमहितानि
गणिकादिललितानि सुरभिचरितानीव
धर्मैकमूलानि भीमदोर्ललितानि
विजयांचितानीव भारताख्यानानि
लक्ष्मणस्फीतानि शत्रुघ्नलसितानि
भरतप्रतीतानि रामचरितानीव

नगराणि निर्माय मन्दाकिनी
सागरं प्रति याति मन्दाकिनी ॥

चतुरास्ययुक्तानि परूषोत्तमात्तानि
सर्वज्ञकलितानि धिषणाभिभरितानि
शुचिधर्मपुण्यजनसंसेवितानि सौ -
म्यांचितानि प्रचेतोंचिता न्यमलानि
सुमनस्स्मृद्धानि सूनुप्रदीप्तानि
जैवात्रुकाद्यानि कविसमुल्लसितानि
नरधर्मरून्द्राणि समजगत्प्राणाधि -
करणानि विबुधेशशरणानि नैकानि

क्षितिसुरस्थानानि रञ्जयन्ती
सागरं प्रति याति मन्दाकिनी ॥

सलिलेन विमलेन मानोज्ञकं वहति
अमृतेन मधुरेण मैधावकं सृजति
ऊर्मिणा मञ्जुना काल्याणकं दिशाति
स्रोतसा भूयसा प्रैयरूपक मेति

अकति......

अन्तरान्तरलीयमानैकतैकता -
नात्मसंस्कृतिसुधास्रोतस्विनीवैति
राजत्सहस्त्रारसारसान्तरलस -
च्चन्द्रमोगलदमृतनिर्झरीवोपैति
सर्वजीवाजीवनाजबञ्जवतुल्य -
दृङ्माधवप्रेमवाहिनीवायाति
तप्तमानवतापपापापहरणार्थ
मुन्मिषन्नलिनाक्षकरूणाझरीवैति

अकति.....

द्रढिमान मुपयाति युवजनोत्कलिकेव
निम्नजनवांछेव लघिमान मनुयाति
प्रथिमान मन्वेति मौनिजनसंविदिव
सत्कविप्रतिभेव महिमान माप्नोति
पटिमान माप्नोति पण्डितप्रज्ञेव
करूणालुसंविदिव म्रदिमान मुपयाति

अभिसरति सागरं मन्दाकिनी
उज्ज्वलस्त्रोतसा मन्दाकिनी ॥

गौरारविन्दनवमालेव मालती -
मालेव मेदिनीदरहासरेखेव
ततइतो वेवेल्लुमाना विलासोर्मि -
चंक्रमणकेलीभि रामोमुदीति सा

मन्दते मन्देव मन्दाकिनी
स्पन्दते मादेन मन्दाकिनी ॥

निर्मलांभस्सितक्षौमावभासिता
सितफेनसुमराजिमञ्जुवेण्यञ्चिता
घलघलितकङ्कणा झणझणितहंसका
चकचकितविभ्रमा धगधगितरूचिकला

अभिसरति सागरं मन्दाकिनी
शुचिरूपरञ्जिता मन्दाकिनी ॥

मन्तूयति क्वापि वल्यूयति क्वापि
केलायति क्वापि खेलायति क्वापि

तन्तस्यति क्वापि गद्गद्यति क्वापि
ईयस्यति क्वापि लोटायति क्वापि

अभिसरन्ती सती मन्दाकिनी
उज्ज्वलस्त्रोतसा मन्दाकिनी ॥

गिरिनिर्झरान् धयत्योषधीरसमयान्
चूषति द्राक्षासवादीनि सुमधूनि
भुङ्क्ते च विविधानि कन्दमूलफलानि
आहरति नैकानि परिमलद्रव्याणि
अपसंचिनोति संफुल्लानि कुसुमानि
पारार्थ्यवर्णानि रत्नानि लालाति

अभिसरन्ती सती मन्दाकिनी
उज्ज्वलस्त्रोतसा मन्दाकिनी ॥

शिवयोगसन्नुता स्तूयमाना क्वापि
नागयोगांचिता नूयमाना क्वापि
भद्रमालायोगमंजुलाकुत्रापि
मत्स्यकूर्माधियोगान्विता कुहवापि
केदारवापिकायोगोद्यता क्वापि
नागकेसरिवज्रयोगोद्धुरा क्वापि
शारदांबुजयोगसमुपस्कृता क्वापि
पारिजातप्रसवयोगोन्नता क्वापि

भाति भाग्यवतीव भागीरथी
याति भाग्यवतीव भागीरथी ॥

मोहनविकस्वरस्वरलहरिकाभिरिव
अमृतं किरन्तीभि रूल्लोललहरीभि
रटवीवधूटिकां रोमांचयन्तीव
सहकारकोकिला नध्यापयन्तीव

शृङ्गारगीतानि गायन्ती
शुचिरसोदंचिता मन्दाकिनी ॥

निक्कणन्तीभिरिव सौवर्णवीणाभि
रारणन्तीभिरिव झल्लरीभि स्सदा
योगिसंविल्लुलितनादधाराभि रिव
मधुराभि रमृतमयधाराभि रायता
उल्लोलहिल्लोलहिन्दोलरागाद्य -
कलहंसकलनादकलगीतरञ्जिता

अभिसरति सागरं मन्दाकिनी
शुचिरसोत्कण्ठिता मन्दाकिनी ॥

अरविन्दमकरन्दमामत्तहंसगति -
राचकितमदमीनवलमानलोचना
डिण्डीरसुकुमारदरहासपेशला
शुचिरसोदञ्चितस्वच्छन्दविभ्रमा
आलोलपवमानवाचालितोल्लोल -
कल्लोलकोलाहलालापलोलुपा

सागरकुमार मभिसरति मन्दाकिनी
सागरकुमारैकशृङ्गारवाहिनी ॥

वेपते पवनेन लीलावनं त्यजति
विद्वेष्टि कौमुदीं क्रशिमान मुपयाति
वैयाकुली मेति घोरमकराहते
र्विरहज्वरार्तैव पाण्डिमान मुपैति
कमलदलवलयोपचारोपलालिता
सागरप्रियविरहदोदूयमाना च

अभिसरन्ती प्रियं मन्दाकिनी
शुचिरसस्त्रोतसा मन्दाकिनी ॥

अरविन्द मपहसति शरदिन्दुमपलपति
घनसार मभिभवति वनसार मपनुदति
मलयानिलं मनसि विलयानलं स्मरति
किसलानि सबिसानि जसति दूरादेव

विरहाकुलेव सा वियदापगा
दुःखाकुलेव सा दोदूयते ॥

कर्पूरपूर मपि दूरीकरोतीव
तारावली मपि न चोरीकौतीव
भृड्ंगालिगीतपपि नाड्गीकरोतीव
लीलया वेणिमपि नालंकरोतीव

विरहविधुरेव सा मन्दाकिनी
दुःखाकुलेव सा दोदूयते ॥

नातिगुरूवीचीभि रित उत्प्लुता सती
नातिलघुवीचिभि स्तत उत्प्लुता सती
आवर्तविभ्रमै रित उल्लसन्तीव

परिवाहविभ्रमै स्तत उल्लसन्तीव
संभ्रमद्धाराभि रित आपतन्तीव
संभ्रमत्संप्लवै स्तत आपतन्तीव

नृत्य मातन्वती मन्दाकिनी
सागरं प्रति याति मन्दाकिनी ॥

प्रस्त्रवणवलभालिकिर्मीररेखाभि
रित उल्लसन्तीव तत उल्लसन्तीव
निर्मलांभस्सितक्षौमस्फुरद्रोचि
रित उल्लिखन्तीव तत उल्लिखन्तीव
शीकरै स्सम्मदश्रीकरै र्जडिमान
मित उत्क्षिपन्तीव तत उत्क्षिपन्तीव

नृत्य मातन्वती मन्दाकिनी
सागरं प्रति याति मन्दाकिनी ॥

क्वापि रङ्गत्तुङ्गभङ्गहस्तोत्क्षेप -
माकुर्वंती लासकीव संक्रीडते
ऊर्मिकाकङ्कणोज्ज्वलवेषपेशला
क्वापि वासकसज्जिकेवदेदीप्यते
क्वपि मकरोरगालोडनव्याजेन
विरहोत्ककान्तेव संक्षोभ मनुभवति

अभिसरन्ती प्रियं मन्दाकिनी
शृङ्गाररसधुनी मन्दाकिनी ॥

क्लेशकर्मविपाकविघ्नाशायास्पृष्ट
पावनाधिष्ठानपरमात्ममूर्ति रिव

नानारसाढ्यासु नैकविधवर्णासु
संचरन्त्यपि तासु तासु भूमीष्वपि
अविहाय नैजं स्वरूपं स्वभावं च
भासमाना रंहसाऽसमाना जगति
कपिलहुंकाराग्निभस्मीकृताकृतीन्
सगरान्ववायजान् दिव मुन्नयन्ती च

पूरयन्ती भगीरथकामितम्
सागरं प्रतियाति मन्दाकिनी ॥

ललिता परीवाहवलिता जलव्यूह -
भरिता परीणाहकलिता चसायाति
चलिता कनन्नालदलिता
वियन्मालगलितासरि
न्मेलहिलिता च सा याति

अभिनीतकुञ्चिता कल्पितव्यंसिता
कृतगजक्रीडिता विहितहरिणप्लुता
कृततलस्फोटिताऽऽदृतहरिक्रीडिता
कृतवृषक्रीडिता सतलसंघट्टिता

विविधप्लुती रसौ मन्दाकिनी
विदधती सा याति मन्दाकिनी ॥

धुतमन्दिमाऽपास्तनतमूकिमा वारि -
कृतसादिमा कीर्णनवचारिमा याति
विहिताशिमा धूतजनवर्षिमा चित्रं -
गतिवक्रिमा वीतजलकालिमा याति

अभिरसति सागरं मन्दाकिनी
उज्ज्वलस्रोतसा मन्दाकिनी ॥

रसरंजिता कुञ्जतलगुञ्जिता शैल -
तटशिंजिताऽऽवर्तकृतगंजिता याति
महदंजिताऽऽनन्दरसपुंजिता शार्क -
रिलगृंजिता पुण्यसुममंजिता याति

अंकति.......

हिमपालिता प्रेमरसलालिता गन्ध -
वहचालिता दिव्य-रयशीलिता साधु

चलदूर्मिपुंजेन ललदूर्मिपुंजेन
लास्यानिलालस्यते - स्वर्णदी
शस्यानि चातन्वती

समुदञ्चिता मञ्जु-किलिकिंचिता वक्र -
पथकुंचिताऽऽमोद-रसचंचिता मंक्षु
ध्वनिर्वींचिजालेन घनवीचिजालेन

चटुलानि मोमुद्यते - स्वर्णदी
नटनानि व्यातन्वती

जितचन्दिरा सिक्त-वनमन्दिरा वीचि -
धुतसिन्धुरा शैल-झरबन्धुरा चारू -
दरहासरेखाभि रिवफेनरेखाभि

रिद्धा नरीनृत्यते - स्वर्णदी
अद्धा वरीवृत्यते

अविदूषिता हंस-कलभाषिता वेणि -
परिभूषिता वीचि-चयपोषिताऽजस्त्र -
मतिसंभ्रमैरेव ततसंभ्रमै रेव
सिकतासु दोद्रूयते - स्वर्णदी
विकृतासु पोप्लूयते

प्लुतवीचिका नर्तितगवाचिका पुष्ट -
तररेचिका कीर्ण-सुमरीचिका तूर्ण -
मुद्यदसिधाराभि रिद्धतरधाराभि

रद्धा पनीपद्यते - स्वर्णदी
इद्धा पनीपत्यते

अपराजिता सार-रसराजिता सर्व -
जनपूजिता वारिजसभाजिता लोक -
जीवनाधारेण पावनापूरेण

जंहम्यते स्वेच्छया - स्वर्णदी
दन्द्रम्यते स्सेच्छया

अतिमञ्जुला पुष्टवनवञ्जुला दीप्त -
सुमकिञ्जला भीततरूकंजलाऽऽलोक -
कनदूर्मिपूरेण ध्वनदूर्मिपूरेण

कलिता विलालस्यते - स्वर्णदी
ललिता विलालस्यते

ततमुंजरा नृत्त - रतकंजरा कृष्ट
मदकुंजरा कीर्णसुममंजरा लोक -
विनुतप्रचारेण अमृतप्रचारेण

सहिता पनीपद्यते - स्वर्णदी
विहिता पनीपत्यते

कृतमङ्गला पल्लवितजङ्गला वीचि -
मयकंगुला पास्तगदजंगुला तीव
जीवनस्त्रोतसा पावनस्त्रोतसा

वलिता च दोद्रूयते - स्वर्णदी
कलिता च सोस्त्रूयते

जयशालिनी घोररयशालिनी दीव्य -
दयशालिनी दिव्यनयशालिनी साधु
पूततरपाथसा व्याततस्त्रोतसा

बंभ्रम्यते स्वेच्छया - स्वर्णदी
रंरम्यते स्वेच्छया

सव्यंसिता सारसवतंसिता मीर -
निरिरंसिता धीरजनशंसिता शुंभ

दमृतप्रचारेण विमलप्रचारेण
भूतले पोप्लूयते - स्वर्णदी
क्ष्मातले पोप्लूयते

नवनलिनदलगलितमधु -
मधुररसभरित
हिमजलदसुमजलद
सूमररूचिपूरा च

अकति......

कम्रारविन्दमधुकाण्डाकुलालिकुल -
कलहंसकलगीतकलकलोदञ्चिता
कमनीयकूलवनकर्णिकाराशोक -
लोध्रपाटलकुसुमलोहितिमलालिता
तटतमालावालदलितदलमर्मर -
स्वनकलितकल्लोलझालंझलाञ्चिता
श्वसनकंपितकम्रवकुलकेतकगलित -
नवपरागावृतोन्नतसैकतस्थला

अकति.....

उभयाञ्जलिस्वादुजलपानपारीण -
जनतामनोलीनवृजिनापनोदा च
सल्लकीपल्लवोभादन्तिखादन -
स्तंबेरमास्फालनोद्यन्महोर्मिका
कल्लोलसांराविणोभयाकर्णिसं -
श्रुतिबिभ्यदग्रेवणप्लायितैणका
अमृतधारापुष्टशोभितप्रियमधुक -
कान्तारकान्ताररंजितोभयतटा

अकति.....

मौक्तिकभ्रान्तिकरमंजुतरदलतरल -
तुहिनलवललितशरतृणखेलदूर्मिका
उपलकुलदन्तुरस्थलपोप्लुवोर्मिरव -

परिवृद्धतीरगिरिवरदरीप्रतिरवा
ऋंजसानस्वनभ्रान्तिकरकल्लोल -
कलकलाहितनृत्तकंजाररंजिता
माद्यज्जरन्तलुषभाजगरहिंसीर -
किरिकुलाकर्षणोदग्रोर्मिसंकुला

अकति....

उल्मुकोच्चिड्ंगटज्वालोज्ज्वलाभील
दावानलप्रशमनोंल्लोलपालिका
पाटीरकोटरोदरलसन्मणिफणा -
नानटल्लेलिहानाहरद्वीचिका
कुत्कीलसोदरप्रोत्तालकल्लोल -
लूनतरमूलतरूकूलवेलाकुला
वीचिकाविक्षेपणोत्पतन्निष्पत -
ज्झषशंकुजलजन्तुर्ंजितोभयतटा

अकति.....

अभयप्रदानशंकावहन्मृगपृष्ट -
तलसंस्पृगुल्लुलितमन्दोर्मिमंजुला
दुर्बलग्रसनपरदुष्टसत्त्वव्रात -
ताडनस्फालनोद्दामोर्मिमण्डिता
वनगजाखेटकव्यापृतव्याधतृद् -
प्रशमनव्यासक्तपाथोविराजिता
कूलमुद्रुजवाजघोरोर्मिसांरावि
णस्थगितवनसत्त्वनानाविधस्वना

अकति.....

गंभीरभूविवरतावरारावकृ -
तालूरबंभ्रमत्कुंभीरभीषणा
तानूरघोरतरकेनारपतयालु -

दुरितात्मदुष्टैधतूद्धरणदीक्षिता
गृहयाय्यकुलसतीकरसमर्पितनिशा -
द्रवविमिश्रस्वर्णवर्णीकृतार्णका
मज्जन्नितंबिनीमणिघनस्तनलिप्त -
कुंकुमद्रवकीर्णकुरूविन्ददीप्तिका

अकति....

पर्फराकमणीचकफरीकभाराव -
नतकम्रकान्तारपर्यटनकौतुका
मृगराजविनिकृत्तगजराजकुंभतल -
जागलन्मुक्ताफलाचिन्वदूर्मिका
आवर्तगर्तकव्यावर्तशोकार्त -
कैवर्तहाहार्तरावप्रवर्तिका

अकति.....

दुरवग्रहक्षीणकलमादिधान्याभि -
पोषणप्रक्रियानिरतधारांचिता
दारिद्र्यदावाग्निदन्दह्यमानोरू -
भारतारामावनैकामृतोदिता
अज्ञानघोरान्धकारावृतस्वान्त -
विज्ञानदीधितिस्फूर्तिदोषःप्रभा
संसारसन्तापसन्तप्तहृत्प्राणि
तान्तसंवित्कलोज्जीवनाभ्युद्यता

अकति......

विविधाधिदुर्व्याधिबाधाविषव्रतति -
मूर्च्छितात्मप्राणिजीवातुवल्लिका
विविधमलमदनालिपावकज्वालिका
कलिकलुषतूलालिवातूलमालिका
दुर्भिक्षभूमिभिद्भेददंभोलिका

दण्डधरयातनाव्रततिकरवालिका

अकति.....

पुण्यतरूमूलावनैकांबुनालिका
प्रकृतिकान्तामणीनक्षत्रमालिका
मनुधर्मदेवतामन्दारमालिका
शैवालजालिकासंपृक्तनीलिका
कल्लोलदोलिकाचाचलन्मालिका
धुतमत्तलालिका द्दतदीर्णतालिका
सन्तुष्टहालिका संपुष्टमूलिका

अकति.....

कुलहण्डकभ्रमत्काकोचिकाचूक -
कोनालकोल्लसत्कूमशतकुक्षिका
किञ्जल्ककम्रतरकल्हारकन्दोट -
करहाटकमनीयकासाररञ्जिता
किकिकाकपिककेकिकलिककञ्जककोक -
कुक्करककृकवाकुकूजितोत्कटतटा
कुटिलकक्खटचटुलकट्रुकमठकर्कट -
प्रकटनोत्कटविकटकुनटोर्मिकोटिका

अकति.....

तीरावतीर्णमदवाराङ्गनातार -
हारावकर्षणस्फारोर्मिमञ्जुला
सकलामतव्यालविकलाकुलस्थूर -
शकलायितस्वान्तसुकलामृतप्रदा
वेलावनालिमृदुलैलादिलतिकालि -
खेलाविलोलोर्मिमालानुलालिता

अकति.....

कामादिदूरिपुविरामात्मसुमनोल -
लामानुकंपाभिरामांबुधारा च
ध्येयावधेयाधिगेयानुसन्धेय -
पेयानुनेयाभिमेयामृतोर्मिका
लोलानिलालोलकीलालमालोप -
लालालितैलारसालालवालाच
कूहाविशंकावगाहामितोहोद्य -
दीहामृगीनिवहहाहारवावहा

अकति....

पद्मिनीमणिपात्रपालिकापरिकीर्ण -
वरगन्धपांसुमयपटवास मादाय
वरवर्णिनीवारमणिक्लृप्तदिव्याङ्ग -
रागमयलेपनद्रव्याणि संस्पृश्य
रंभोरूकाण्डोरूराजीपुरोन्यस्त -
पक्वतरमधुरतरफलजाल मवमृश्य
श्यामासमाकीर्णचारूतरसक्रमुक -
तांबूलपर्णांनि तलिनानि संगृह्य

अकति......

जीवनाधिष्ठान पावनाशय नाथ
क्वासीति तारतर माब्रुवन्तीवैति
वन्धो। प्रसीदेति दर्शनं देहीति
भुवनेश्वरेहींति चाह्वयन्ती वैति
मद्वियोगाग्निना प्रिय रसात्मकतया
परिणतः किमसीति क्लिन्दमानेवैति
अमृतैकशेवधे भागधेयावधे
सत्प्रेमरसनिधे त्वरित मायाहीति

ऊर्मिरवकैतवा न्मन्दाकिनी
सागरं प्रतियाति मन्दाकिनी ॥

दुरवग्रहादिदुष्परिपन्थिसन्तान -
मभिजित्य भूमितल मामोदयन्ती च
आध्मातविमलान्तरङ्गशंखोत्थित -
प्रणवमयनादेन योगिनीवाभाति
अब्जस्वरस्थानपवनतन्त्रीलसद् -
ब्रह्मनाडीविपंचीदिव्यवाद्येन
चञ्चत्सहस्त्रारसारसांचन्मुक्ति -
कामिनीवोंकार मालापयन्ती च
बुद्धात्मह्न्मरून्मयताललयमंजु -
लोंकारचिन्नादपीयूषधाराभि -
राप्लावयन्ती समस्तानि भुवनानि
सा पराशक्ति रिव सा मुक्तिकान्तेव

चंचति स्त्रोतसा मन्दाकिनी
चंन्दति स्त्रोतसा मन्दाकिनी ॥

प्रांचत्सहस्त्रारपुष्करान्तरलसद् -
बिन्दुमण्डलमध्यमंजुमोहनमूर्ति
मखिलशेषिण मब्जसुषमासमाश्लिष्ट
ममृतसागर माश्रिताऽऽदिनारायणम्
निजकल्पितेनेव घण्टानिनादेन
चिणिमयेन प्रणवनादेन केनापि

योगिनीवान्तरे रंरम्यते
भोगिनीवान्तरे रंरम्यते ॥

दुर्भिक्षदुस्तापदुर्दोषदुर्मार्ग -
सन्दलनसन्नद्धनिस्साणनाद मिव
उल्लोलहिल्लोलतल्लजव्रातेन
प्रणवमञ्जुलनाद मापादयन्ती च
प्रकृतिकान्तालास्यपारवश्याधान -
चित्तरङ्गमृदङ्गसङ्गीतनाद मिव
प्रणवगुञ्जन्मञ्जुरञ्जन्निनाद मा
पूरयन्ती परा नाडीव सा याति

अकति.......

नादबिन्दुकलैकयोगानुभूतिपर -
मामृतामोदसंभ्रमदन्तरङ्गा च
खेचरीभूचरीमध्यमाषण्मुखी -
मुद्राविलासगतिलीलाविलोला च
पूर्वपश्चिमतानकूर्मटिट्टिभकेकि -
वारिजस्वस्तिकासनसिद्धिसिद्धा च

योगिनीवाभाति मन्दाकिनी
भोगिनीवाभाति मन्दाकिनी ॥

अमृतधारासिक्तहृदयकेदारेषु
सुकृतैकसंस्कारसस्येषुं पुष्टेषु
परमरसनिर्झरै र्दावभवतापेषु
शमितेषु सत्कलारामेषु पुषितेषु
लसदमृतचित्कलाचञ्चलासुषमासु
प्रोन्मिषन्तीषु परमाकाशवीथीषु
सुमनोमयूरेषु लास्यैकलसितेषु
ओंकारगंभीरमञ्जुलस्तनितेन

विमलामृतासारपूर माकल्पयति

कादंबिनीव सा मन्दाकिनी
सा पराशक्तिरिव मन्दाकिनी ॥

कालत्रयाबाध्यकम्रस्वरूपा च
स्वान्तरङ्गभ्रमन्निश्शेषभुवना च
सर्वलोकातीतभूरिप्रभावा च
सर्वजीवोज्जीवनाधाननिरता च
शुद्धसत्त्वोद्रेकदेदीप्यमाना च
सिद्धसंकल्पसन्तोष्टूयमाना च
नित्यानपायपरिपूतप्रचारा च
सत्यसुन्दरशिवस्फारस्वरूपा च

सा परा शक्तिरिव मन्दाकिनी
स्पन्दते सर्वतो मन्दाकिनी ॥

संसुप्तभुजगीव वायुकुंभनवशात्
बुद्धाऽतिकुपिता सुषुम्णेव सा याति
परनिजाधिष्ठानशुचिकलालालिता
पतिसङ्गमायेव सापरा रंहते
अंबरांबरकेशधरणिधरबन्धदु -
ग्रंन्थित्रयं साधु निर्भिद्य वेगेन
मण्डला न्यतिगम्य चक्राणि परिभूय
सा परा स्वस्थान मायाति वेगेन
चञ्चत्सहस्रारकमलान्तरस्फुरद्
बिन्दुमण्डलमध्यतेजोविराजितं

सा परा शक्तिरिव पुरूषोत्तमम्
अमृतसागर मेति मन्दाकिनी ॥

अश्रान्तविस्फुरत्सौदामनीकोटि -
सुषमासमुन्मेषसौभाग्यसंपदं
दुर्निरीक्षप्रभाशोभितानन्तमणि -
तेजोमरीचिकावीचिकाप्राञ्चितं
कौमुदीपरिकिरद्राकातुषारोस्त्र -
कोटिशीतिमचारिमामोदशेवधिम्

अमृतसागर मेति मन्दाकिनी
संविन्नदीव सा मन्दाकिनी ॥

कुलपथाकुण्ठितोदञ्चत्प्रचारा च
परहंसगमनाच सत्कलावलिता च
सुरूचिमूलाधारपाथोजचरणा च
पावनाधिष्ठानकंकणोल्लसिता च
हृत्तलानाहताद्भुतरत्नमाला च
ग्रीवाविशुद्धमङ्गलसूत्रकलिता च
भास्वदब्जोल्लसत्ताटङ्कदीप्रा च
सुन्दरशतहृदावलितस्वरूपा च

मुक्तिकान्तेव सा योगीश्वरम्
अमृताब्धि मुपगूहते - स्वर्णदी

नृपभगीरथमहातपसा कृतागमां
मधुरामृतप्रेममंजुलमहिम्ना च
सर्वात्मनाऽऽविर्भवन्तीं द्रवीभूय

भुवनवरिवश्यिता मासेव्यजीवनां
शुचिरसास्वादिमप्रथमोद्गमावनीम्
अमृतस्त्रवन्तीं स्त्रवन्तीसमर्चितां
त्रैलोक्यपावनी मात्मनः प्रियतमाम्
उपगूह्य सागरो हिल्लोलपाणिभि
स्स्वात्मनि विलापय त्यानन्दवाहिनीम् ।।

विषम पद टिप्पणी

पुटे			
1	परिवहः	-	वियद्गङ्गायाउद् भवस्थानम्
6	हिल्लोलः	-	महातरङ्गः
9	जुहुराणः	-	चन्द्रः
13	वाजः	-	वेगः
28	तूस्तः	-	पापी
36	खतमालः	-	धूमः
37	इरिणम्	-	ऊषरक्षेत्रम्, शून्यञ्च
37	कामलः	-	मरूः
42	ह्वरः	-	मूर्खः
42	सिद्धः	-	साधुः
42	मीध्द्रः	-	विमलः
42	रिष्वः	-	हिंस्रः
42	चर्षणिः	-	जनः
42	कुल्मलम्	-	पापम्
42	वर्वरः	-	प्राकृतोजनः
42	गर्वरः	-	अहङ्कारी
42	मर्मरीकः	-	हीनजनः
42	झर्झरीकम्	-	शरीरम्
46	गेष्णुः	-	गायनः
	देष्णुः	-	दाता
	अप्तुः	-	वपुः
	यातुः	-	अध्वगः
	भरूः	-	स्वामी
	यजतः	-	ऋत्विक्
	नमतः	-	प्रह्वः
	गङ्गोलम्	-	गोमेदमणिः

पुटे			
	वञ्चथः	-	वञ्चकः
	वन्दथः	-	स्तोता
	अमतः	-	रोगः
48	धन्व	-	मरूः
48	वलिजम्	-	केदारः
50	कुडुपः	-	चर्मवाद्यविशेषः
	करडः	-	देवालये वाद्यमानो महान् कांस्यघण्टा विशेषः
	कुहणम्	-	काहला
	खुत्तम्	-	संगीतगमकम्
	खुल्लुम्	-	हलाक्षताभूः
	नारहाटम्	-	संगीतध्वनिः
	नारङ्गभरिमा	-	स्फुटिताभूः
	जञ्जनी	-	वेणुध्वनिः
	कुसितः	-	ग्रामः
	मरूकः	-	मृगः
	कुब्रम्	-	विपिनम्
	चुब्रम्	-	रूचिरम्
	कन्दोटम्	-	कुमुदवनम्
	वेलम्	-	वाटी
52	पेत्वम्	-	अमृतम्
56	किट्टालम्	-	लोहमलम्
	क्रिमिशैलः	-	वल्मीकम्
	कनलम्	-	सुन्दरम्
	गुन्दलम्	-	मर्दलध्वनिः
	गण्डोलम्	-	पर्व
	कंजलः	-	शारिका

57	वेपः	-	अनवद्यः
	वापः	-	क्षेत्रम्
	कूपांगपुंगम्	-	पुलकचयः
	पलांगः	-	मकरः
58	सरिमा	-	मारूतः
58	बाटी	-	वास्तुभूः
59	तृणावर्तः	-	वात्या
	नन्दिवर्तः	-	मीनविशेषः
	वार्तः	-	पुष्टः
	गवाची	-	मीनभेदः
	रेची	-	अङ्कोलः
	हेलुञ्ची	-	क्षीरशाकविशेषः
	रोची	-	हिलमोचिका
	माची	-	मार्गः
	तलाची	-	नलविशेषः
60	तृणकन्दः	-	कशेरूः
	मुचुकुन्दः	-	पुष्पतरूभेदः
	पिचुमुन्दः	-	निंबः
	कालिन्दः	-	उर्वारूकविशेषः
	पालिन्दम्	-	कुन्दुरूकम्
	शिलिन्दः	-	मीनभेदः
	भन्दम्	-	सुन्दरम्
	कुरुविन्दः	-	मुस्ता
61	पावनम्	-	पवित्रम्, जलंच

75	कंजरः	-	केकी
	मंजरं	-	पद्मकन्दः
	कंगुलः	-	हस्तः
	जंगलं	-	वनम्
	जंगुलं	-	विषम्
76	मीरः	-	सागरः
77	ऋंजसानः	-	मेघः
	कंजारः	-	मयूरः
	जरंन्तः	-	कासरः
	लुषभः	-	मत्तगजः
	उल्मुकम्	-	अलातः
	उच्चिंगटम्	-	प्रचण्डम्
	कुत्कीलः	-	गिरिः
78	तावरम्	-	ज्याघोषः
	तालूरः,तानूरः	-	आवर्तः
	केनारः	-	कुंभीनरक
	एधतुः	-	पुरूषः
	पर्फरीकम्	-	नवपल्लवः
	मणीचकम्	-	कुसुमम्
	फरीकम्	-	फलम्
79	मालिकः	-	सप्तलाः
	लालिकः	-	महिषः
80	कुलहण्डकः	-	आवर्तः
	कूमम्	-	कासारः

विशेष धातु सूची

पुटे			
1	अक	-	कुटिलायां, गती
	चक	-	तृप्तौ
	तक	-	हसने
	जल	-	धातने
	सल	-	गतौ
	स्यन्दू	-	प्रस्रवणे
	स्पदि	-	किंचिच्चलने
	स्कुदि	-	आप्रवणे
	षूद	-	क्षरणे
	ह्लाद	-	अव्यक्ते, शब्दे
	युतृ,जुतृ	-	भासने
	श्रथि	-	शैथिल्ये
	अहि	-	गतौ
	महि,बहि	-	वृद्धी
3	कल्ल	-	अव्यक्ते शब्दे
	मल्ल	-	धारणे (धृतौ)
	कंच, कांच	-	दीप्तिबन्धनयोः
	शल्भ	-	कत्थने
	गल्भ	-	धार्ष्ट्ये
	त्रकि	-	गतौ
	वकि	-	कौटिल्ये
	ह्राद	-	शब्दे
	श्विदि	-	श्वैत्ये
4	कस	-	गतौ
	कष	-	हिंसायाम्
	श्रधि	-	शैथिल्ये

पुटे			
13	जव	-	वेगितायांगतौ
18	ढौकृ	-	गतौ
	गल्ह	-	कुत्सयाम्
	गर्ह	-	विनिन्दने
	गुप	-	गोपने
	ग्लेषु	-	अन्विच्छायाम्
	ग्लेवृ	-	सेवने
	सृभि	-	ताडने
	कुभि	-	आच्छादने
	लुभि	-	अर्दने
20	स्फूर्च्छा	-	विस्तृतौ
	ओस्फूजा	-	वज्रनिर्घोषे
	स्फुडि	-	परिहासे
	ष्णुह	-	उद्गिरणे
	स्फुर्ण	-	वृद्धौ
21	तेपृ	-	सेचने
	रेपृ	-	गतौ
	क्षीवृ	-	मदे
	षीभृ	-	कत्थने
	वाड्ट	-	आप्लाव्ये
	शाड्ट	-	श्लाघायाम्
	दक्ष	-	वृद्धौ
	धुक्ष	-	सन्दीपन, क्लेश्न संजीवनेषु
	अहि,रहि	-	गतौ
	वहि, महि	-	वृद्धौ
	जृभि	-	गात्रविनामे

	ग्रथि	-	कौटिल्ये
34	मदि	-	मोद मद, स्वप्न कान्तिषु
35	द्रम्म, ह्रम्म	-	गतौ
45	शुचिर्	-	पूतीभावे
46	तूष	-	तुष्टौ
	पूष	-	वृद्धौ
	षुह	-	चक्यर्थे
	षह	-	तृप्तौ
47	फक्क	-	नीर्चौगतौ
	जिवी, हिवी	-	प्रीणने
	पिवि	-	सेचने
	सूर्क्ष	-	आंदराना दरयोः
49	णिवि	-	सेचने
	कुठि	-	प्रतिघाते
	लुठि	-	आलस्ये गतौच
	इगि, रिगि, वगि, वल्ग	-	गतौ
	शाखृ	-	व्याप्ती
	म्लेटृ	-	उन्माने
	शौटृ	-	गर्वे
	कड्ड	-	कार्कश्ये
	चुड्ड	-	भावकरणे
	पर्प, सुप्लु	-	गतौ
	षिभि	-	हिंसायाम्
	शुंभ	-	भासने
	ष्टै	-	वेष्टने
	दैप	-	शोधने
	पै, ओवै	-	शोषणे

	श्वंभु	-	प्रमादे
	इवि	-	व्याप्तौ
	धवि	-	गतौ
	हुर्च्छा	-	कौटिल्ये
	गजि, गृजि	-	शब्दार्थौ
	त्रदि	-	चेष्टायाम्
	वञ्चु, तञ्चु	-	गतौ
	इगि, वगि, त्वगि, रिगि	-	गतौ
	श्रन्थ	-	विमोचनप्रति
	कुन्थ	-	संश्लेषणे
	मृड	-	सुखे
	मृद	-	क्षोदे
	ऋधु	-	वृद्धौ
	दंभु	-	दंभने
	ञिधृषा	-	प्रागल्भ्ये
	तिगि	-	गतौ
60	स्फायी, ओप्यायी	-	वृद्धौ
	क्नूयी	-	शब्दे उन्दनेच
	तायृ	-	सन्तान पाल न
	स्कभि	-	प्रतिबन्धे
	जभि	-	गात्रविनामे
	हिडि	-	गत्यनादरयोः
	हुडि	-	संघाते
	कडि	-	मदे
	चडि	-	कोपे
	दाघृ	-	आयामे
	ध्रोकृ	-	शब्दो त्साहयोः

कुथि,पुथि - हिंसा, संक्लेशनयोः
50 मदी - हर्षे
ञिमिदा - स्नेहने
मिदि - स्नेहने
मेह - मेधाहिंसनयोः
पीव, मीव - स्थौल्ये
द्रै - स्वप्ने
रै,कै,गै - शब्दे
चदि - ह्लादे
स्त्यै - शब्दसंघातयोः
शै - पाके
शलृ - गतौ
पै,जै - क्षये
जर्ज - परिभाषण, हिंसात र्जनेषु
धर्ज - गतौ
गर्ज - शब्दे

ष्वक्क - गतौ
67 मन्तु, रोषे - वैमनस्येच
वल्गु - पूजायां
केला, लोटा - विलासे
तन्तस - दुःखे
गद्गद - वाक्यस्खलने
ईयस् - ईर्ष्यायाम्

5 विष्णुपद........... 29 प्रादुःकरोति.....सुमनोधि 30 निम्नतल निखिलागमान्त
31 स्वैरवाचा......अज्ञात..... 37 आशयेन 42 अश्रान्त.........
52 माधव.......... 53 भ्रमरक....... 65 पद्माञ्चितानि....चतुरास्य..
68 शिवयोग......... 79 पद्मिनी.......इत्यादिगीतेषु श्लेषो विभावनीयः